जैनागमोत्पत्तिः।

कालप्रवाहाऽपेक्षया जैनदर्शनमनादिनिधनमपि वर्तमानावसर्पिणीकालभवचतुर्विंशतितीर्थकराऽपेक्षया [3]श्रीऋषभदेवाद् भगवत उदपद्यतातः सादिकमित्यपि वक्तुं शक्यते। पूर्वतीर्थकरसिद्धान्ते विनष्टे सति सर्वत्र धर्मशैथिल्ये प्रविष्टेऽपरस्तीर्थकरः समुत्पद्य स्वकालस्थलोकेभ्यस्तत्कालक्षेत्रस्वभावादिकमपेक्ष्य तदेव प्रमाण-प्रमेयादि निर्बाधं तत्त्वं तत्तत्काललोकानुकूलया सरण्या परेभ्य उपदिशति; यत् पूर्वतीर्थंकरैरुप[4]दिष्टमिति जैनप्रणाली।

एवं क्रमशस्त्रयोविंशतीर्थंकरश्रीपार्श्वनाथशासनस्य विच्छेदे सति वर्यज्ञानतपश्चर्यादिश्रिया वर्धमानः श्रीवर्धमानापरनामा महामनाश्चतुर्विंशतीर्थकरः श्रीमहावीरप्रभुः प्रभूय केवलाऽऽलोकेन यत् प्रमातृ-प्रमाण-प्रमेयादितत्त्वं प्रकटीचकार तदेव श्रीइन्द्रभूतिगौतमगणधरादि[5]भिस्तच्छिष्यैर्भूरिसूरिभिश्च सूत्रग्रन्थादिरूपेण

मुख्यग्रन्थेषु परस्परदर्शनोल्लेखदर्शनात्, यथा—ब्रह्मसूत्रे द्वितीयाध्याये, ऋग्यजुर्वेदादिषु च जैनदर्शनोल्लेखो नैकशो दृश्यते। जैनग्रन्थेषु च साङ्ख्य-नैयायिक-चार्वाक-वेदान्तादिदर्शनोल्लेखो वरीवर्ति।

3 श्रीमद्भागवतेऽपि (५ स्कन्धे) ऋषभदेवस्य चरित्रं कीर्तितमस्ति।

4 सूत्रकृताङ्गद्वितीयाऽध्ययने।

5 अत्थं भासइ अरहा सुत्तं गंथंति गणहरा निउणं।
सासणस्स हियट्ठाए तओ सुत्तं पवत्तेइ॥
" विशेषावश्यकभाष्य गाथा ११९ "।

संगृहीतं, तस्य संग्रहस्य जैनागमश्रुतसूत्रसमयसिद्धान्तादीनि नामधेयानि सन्ति। स च संग्रहो मूलभेदाद् 6द्वादशधा, मूलेतरभेदैश्चानेकधा वर्तते।

आगमसाहित्ये दर्शनशास्त्रम्।

आगमसाहित्यस्य मुमुक्षुमोक्षप्रापकत्वात् प्राचीनत्वात्, समग्रप्रतिबोधकत्वाच्च तत्र दर्शनशास्त्रस्यातीवसंक्षेपतया खण्डशश्च निर्देशः कृतः। तथापि सूत्रकृताङ्गसूत्रे समयाख्ये प्रथमाध्ययने बौद्ध-चार्वाक-सांख्य-अद्वैतवादि-नियतिवादि-क्रियाऽक्रियावादि-ज्ञानाऽज्ञानवादिप्रभृतीनां नैकानि दर्शनानि प्रमाणानि च निर्दिश्य निराकृतानि। दृष्टिवादाख्यं द्वादशाङ्गसूत्रं तु गीर्वाणभाषायामनेकदर्शनसिद्धान्तानामतिविस्तृतितः प्रतिपादकमासीदिति नन्दिसूत्रादिभ्यो विज्ञायते, तत्र प्रमाणनयस्याद्वादसप्तभङ्गीनिक्षेपादीनां चारुरीत्या चर्चाऽऽसीत्, परन्त्वस्मदूदुर्दैवोदयात् स दृष्टिवादो बहुकालतो विच्छिन्न इति श्रूयते। चतुर्दशसु पूर्वेषु मध्ये, उत्पादाऽस्तिनास्तिप्रवादादिषु बहुषु पूर्वेषु बहुविधदर्शनप्रमाणनयादीनामुल्लेखो वरीवर्ति स्म। एवमाचाराङ्ग-प्रज्ञापनादिसूत्रेष्वपि कुत्रचित् प्रमातृचर्चा, कुत्रचन नयचर्चा क्वापि प्रमाणप्रतिपादनं, कुत्रचित् प्रमेयसद्भावं सुधा

6 तत्त्वार्थभाष्ये अ० १–२०।

मनुष्याऽर्धमागधीगिरा [illegible] । [illegible] राजप्रश्नकृते न [illegible] प्रतिपादिता । स्थानाङ्गे [illegible], नन्दीसूत्रे च पञ्चविधज्ञाननिरूपणं [illegible] । अनुयोगद्वारे सूत्रेऽपि प्रमाणानि [illegible] । पर पूर्वोक्तेष्वागमग्रन्थेषु [illegible] 8मत्यादिपञ्चविधस्य ज्ञानस्य [illegible] ।

यद्यपि 9नन्दीसूत्रादिषु आगमतर्कपद्धत्यनुकूलः प्रमाणद्वयवादोऽपि निरूप्यते, तथानुयोगद्वारेण च सूत्रान्तरेण कुत्रचित् प्रत्यक्षानुमानोपमानागमाख्यं प्रमाणचतुष्टयमन्यादृश प्रकारो दृश्यते, परन्तु तेषु सूत्रेषु प्रमाणसङ्ख्याविषये समन्वयस्तु न समीक्ष्यते ।

---

7 मुख्यतया तु पञ्चविधं ज्ञानमेव प्रतिपादितं, तद्यथा-" कतिविहे णं भंते ! नाणे पन्नत्ते ? गोयमा ! पञ्चविहे नाणे पन्नत्ते, त जहा-आभिणिबोहियनाणे, सुयनाणे, ओहिनाणे, मणपज्जवनाणे केवलनाणे... ।" भगवतीसूत्रे ८ शतके, २ उद्देशे, ३१८ सूत्रम् । (कतिविधं भदन्त ! ज्ञानं प्रज्ञप्तं ? गौतम ! पञ्चविधं ज्ञान प्रज्ञप्त, तद् यथा-आभिनिबोधिकज्ञानं (मतिज्ञान) श्रुतज्ञानं, अवधिज्ञानं, मन पर्यवज्ञानं, केवलज्ञानं । इतिच्छाया) एवं राजप्रश्नकृतेऽपि ज्ञानभेदाः सन्ति, तद् भगवतीसूत्रवचनादेव ज्ञायते यथा-" एवं जहा रायप्पसेणइए णाणाणं भेदो तहेव..." भ. श. ८-२ सू० ३१८ ।

8 आभिनिबोधिकज्ञानस्य मतिज्ञानमित्यपि नाम धेयमस्ति ।

9 नन्दीसूत्रं २, पृ० २२ ।

आगमतर्कपद्धत्या प्रमाणविचारः।

तर्कमार्गं मुख्यतयानुसरद्भिर्जैनतार्किकैः प्रत्यक्षपरोक्ष-प्रमाणद्वयवादः [10]स्थापितः; स च विचार्यमाणायामागमपद्धत्या न विरुद्ध आगमपद्धतित इति निश्चितं प्रतिभाति [11]अत एवाऽऽगमेतर-ग्रन्थकारेषु प्रथमं श्रीउमास्वातिवाचकवर्यैः 'तत्त्वार्थाधिगमे सूत्रे' [12]आगमरीत्या पञ्चविधं ज्ञानं प्रदर्श्य "आद्ये परोक्षम्" (तत्त्वार्थ० अ० १ सूत्रं० ११) "प्रत्यक्षमन्यत्" (त० १–१२) इति सूत्राभ्यां तत् प्रत्यक्षपरोक्षप्रमाणयोर्मध्येऽन्तर्भावितम्। "तत्प्रमाणे" (त०१–१०) इति सूत्रेण च प्रमाणस्य द्वैविध्यमेव स्थापितम्। "सर्वाण्येतानि मतिश्रुतयोरन्तर्भूतानीन्द्रियार्थसन्निकर्षनिमित्तत्वात्। किंचान्यत्, अप्रमाणान्येव वा। कुतः? मिथ्यादर्शनपरिग्रहाद् विपरीतोपदेशाच्च" (तत्त्वार्थ० १–१२ भाष्यम्) इति स्वोपज्ञभाष्ये च प्रत्यक्षानुमानोपमानाऽऽगमाख्यः प्रमाणचतुष्टयवादोऽपि निरस्तः। यत्तु आगमेऽनन्तरोक्तप्रमाणचतुष्टयवादोऽपि दृश्यते, स नैयायिकादिसिद्धान्तापेक्षया वर्तते, नयवादान्तरेण च तत्र प्रतिपादितो भवेदिति समाहितं तैः।

---

10 श्री सिद्धसेनदिवाकरहरिभद्रविद्यानन्दमाणिक्यनंदिभिः।

11 आगमपद्धतिपक्षपातिभिः श्रीदेववाचकजिनभद्रक्षमाश्रमणादिभिरपि प्रमाणद्वयं स्वीकृतम्। 12 तत्वार्थ० १–९।

आगमतर्कपद्धत्या प्रमाणविचारः।

तर्कमार्गं मुख्यतयानुसरद्भिर्जैनतार्किकैः प्रत्यक्षपरोक्ष-प्रमाणद्वयवादः [10]स्थापितः; स च विचार्यमाणायामागमपद्धत्यां न विरुद्ध आगमपद्धतित इति निश्चितं प्रतिभाति [11]अत एवाऽऽगमेतर-ग्रन्थकारेषु प्रथमं श्रीउमास्वातिवाचकवर्यैः 'तत्त्वार्थाधिगमे सूत्रे' [12]आगमरीत्या पञ्चविध ज्ञानं प्रदर्श्य "आद्ये परोक्षम्" (तत्त्वार्थ० अ० १ सूत्रं० ११) "प्रत्यक्षमन्यत्" (त० १-१२) इति सूत्राभ्या तत् प्रत्यक्षपरोक्षप्रमाणयोर्मध्येऽन्तर्भावितम्। "तत्प्रमाणे" (त०१-१०) इति सूत्रेण च प्रमाणस्य द्वैविध्यमेव स्थापितम्। "सर्वाण्येतानि मतिश्रुतयोरन्तर्भूतानीन्द्रियार्थसन्निकर्षनिमित्तत्वात्। किंचान्यत्, अप्रमाणान्येव वा। कुतः? मिथ्यादर्शनपरिग्रहाद् विपरीतोपदेशाच्च" (तत्त्वार्थ० १-१२ भाष्यम्) इति स्वोपज्ञभाष्ये च प्रत्यक्षानुमानोपमानाऽऽगमाख्यः प्रमाणचतुष्टयवादोऽपि निरस्तः। यत्तु आगमेऽनन्तरोक्तप्रमाणचतुष्टयवादोऽपि दृश्यते: स नैयायिकादिसिद्धान्तापेक्षया वर्तते, नयवादान्तरेण च तत्र प्रतिपादितो भवेदिति समाहितं तं।

---

10 श्री सिद्धसेनदिवाकरहरिभद्रविद्यानन्दमाणिक्यनन्दिप्रभृतिभिः।

11 आगमपद्धतिपक्षपातिभिः श्रीदेववाचकजिनभद्रक्षमाश्रमणादिभिरपि प्रमाणद्वयं स्वीकृतम्। 12 तत्त्वार्थ० १-६।

प्रतिपन्नम्। नैयायिकबौद्धादीनां तर्कस्य विकसिते सति, 'इन्द्रियमनोनिमित्तं घटपटसुखादिज्ञानमपि [22]प्रत्यक्षम्' इतिकल्पना सर्वत्र प्रसृतवती, सा च स्थूलव्यवहारदृष्ट्या जैनानामपि नानुचितेति हेतोर्नन्दिसूत्रादिषु इन्द्रियव्यवधानात् तादृश मतिज्ञानं परोक्षमपि लौकिकप्रत्यक्षतया समर्थितम्। विशेषावश्यकभाष्येऽपि "इंदियमणोभवं जं तं संववहारपच्चक्खं" (गाथा ९५) इति गाथया घटपटसुखादिज्ञानस्य व्यवहारेण प्रत्यक्षत्वमङ्गीकृतम्। वस्तुतस्तु आत्मातिरिक्तद्वारा जायमानत्वात् तदप्रत्यक्षमेवास्तीति [23]नन्द्यादिषु समाहितम्।

पदेशादि च बाह्यनिमित्तं प्रतीत्य तदावरणकर्मक्षयोपशमापेक्षस्याऽऽत्मन उत्पद्यमानं मतिश्रुतं परोक्षमित्याख्यायते, त० सर्वार्थसिद्धिटीका। अ० १-११।

22 "एवं प्रत्यक्षं लौकिकालौकिकभेदेन द्विविधम्। तत्र लौकिकप्रत्यक्षे षोढा सन्निकर्षो वर्णित, अलौकिकसन्निकर्षस्त्रिविदानीमुच्यते—

अलौकिकव्यापारस्त्रिविधः परिकीर्तितः।

सामान्यलक्षणो ज्ञानलक्षणो योगजस्तथा" ॥ ६३ ॥

इति सिद्धान्तमुक्तावलीप्रत्यक्षखण्डे, पृ० २३। न्यायबिन्दुप्रथमपरिच्छेदे। योगसूत्रवृत्तिसमाधिपादे। सांख्यकारिकागौडपादभाष्ये पृ० ४। नन्दीसूत्रं ३, पृ० ७३। एवमाप्तपरीक्षा-प्रमेयकमलमार्तण्ड-प्रमाणलक्षणादिष्वपि च ऐन्द्रियकज्ञानं सांव्यवहारिकत्वेन प्रतिपादितम्।

23 नन्दिसूत्रं २४, पृ० ५१। तत्वार्थसूत्रन्यायावतारादिष्वप्यप्रत्यक्षनेवोक्तम्।

प्रमाणनयतत्त्वालोकाऽऽलोचना।

प्रौढसैद्धान्तिकतार्किकवैयाकरणकविचक्रवर्तिनै प्रमाणकोविदैः श्रीवादिदेवसूरिपादैरागम[24] सिद्धसेनहरिभद्राचार्यादिग्रन्थानभ्यस्य; दुर्वादिवादाँश्च निरस्य; तीर्थपतिमुपास्य प्रमाणनयतत्त्वालोकाख्यो-ऽयं ग्रन्थो जग्रन्थे। अत्र ग्रन्थे पूर्वभूरिसूरिरीतिमनुसृत्य प्रत्यक्ष-परोक्षलक्षणं प्रमाणस्य द्वैविध्य प्ररूपितम्। प्रत्यक्षस्य तावत्-सांव्यवहारिकपारमार्थिकौ भेदौ प्रदर्श्य सांव्यवहारिकप्रत्यक्षस्येन्द्रि-यानिन्द्रियनिबन्धनाद् द्वौ प्रकारौ प्रदर्शितौ। इन्द्रियानिन्द्रिययोश्चै-कशोऽवग्रहादिभेदेन चतु प्रकारत्वमुल्लिखितम्[25]। पारमार्थिकप्रत्य-क्षस्य चागमतर्कपद्धतिममताऽवधिमनःपर्याय-केवलज्ञानभेदतः त्रैविध्यं समर्थितम्। परोक्षस्य स्मरणप्रत्यभिज्ञानतर्कानुमानागमभेदै पञ्चवि-धत्वमुक्तम्। प्रत्यक्षानुमानयोः स्वार्थपरार्थता च सिद्धसेनदिवाकरा-दिवत् साधिता।

श्रीवादिदेवसूरिसमयपर्यन्तं प्रमाणनयादिविषये दार्शनिको यावान् विकासोऽभवत् तावन्तं समस्तमत्र ग्रन्थे ते सूत्रितवन्तः।

---

24 श्रीसिद्धसेनहरिभद्रमुखाः प्रसिद्धास्ते सूरयो मयि भवन्तु कृत-प्रसादाः। येषां विमृश्य सततं विविधान् निबन्धान् शास्त्रं चिकीर्षति तनु-प्रतिभोऽपि मादृक्॥ प० १ स्याद्वादरत्नाकरस्य प्रथमे भागे श्लो० ८।

25 प्रमाणपरीक्षाप्रमाणलक्षणन्यायदीपिकादिदिगम्बरग्रन्थेष्वपि प्रपंचि-ते सर्वे प्रकारा दृश्यन्ते। अवग्रहाद्योऽवग्रहादयश्च भेदा आगमेष्वपि सन्ति। हेमच न्द्रसूरिभिस्तु विस्तरात् प्रमाणमीमांसाया प्रमाणभेदाश्चर्चिता।

पक्षसाध्यदृष्टान्तहेतूपलब्ध्यनुपलब्धिसप्तभङ्गीहेत्वाभासनयनयाभास-वादवादिस्वरूपभेदादिकं सविस्तरमस्मिन् ग्रन्थेऽतीव स्पष्टतया प्रतिपादितम्, येनाल्पमतिरपि सम्यक्तया पठितुं प्रत्यलो भवेत्।

परीक्षामुखेन सह तुलनाविचारः।

अस्य प्रमाणनयतत्त्वालोकस्य श्रीमाणिक्यनन्दिविरचित-परीक्षामुखसदृशी प्रतिभासते। परन्तु यादृशं स्पष्टत्वं विशदत्वं ललितपदोपन्यासत्वं च प्रमाणनयतत्त्वालोके विलोक्यते; तादृशं परीक्षामुखग्रन्थे न प्रेक्ष्यते। तथाहि-सन्निकर्षादिखण्डन-विपर्ययादि-लक्षणाऽ[26]वग्रहादिभेदचतुष्टयावस्थादिविकलपारमार्थिकज्ञान-चतुर्विधाऽभाव-सप्तभङ्गी-सकलादेश-विकलादेश-नय-तदाभासभेदलक्षणोदाहरण-[27]वाद-वादि-सभ्य-सभापतिस्वरूपादिकं परीक्षामुखग्रन्थे न ग्रथितम्। प्रमाणनयतत्त्वालोके त्वेतत् सकलं समस्ति।

---

26 प्रमेयरत्नमालाख्यायां परीक्षामुखटीकायां तु प्रत्यक्षस्यावग्रहादयो विकलपारमार्थिकप्रत्यक्षभेदाश्च लिखिताः। प्रमेयकमलमार्तण्डेऽप्येते प्रतिपादिताः सन्ति।

27 "प्रमाणतदाभासौ ...(परीक्षामुखं ६–७३)" इत्येकेन सूत्रेण वादिप्रतिवाद्यादिविषये सूचितम्। 'संभवदन्यद्विचारणीयमिति' (परीक्षा० ६–७४) इत्यन्तिमसूत्रेण च नयानुक्तनयनयाभासादिविषयेऽन्यतो ज्ञेयमिति प्रेरितं परीक्षामुखकर्त्रा, परं न तत्र ग्रन्थे सूत्रितम्।

परीक्षामुखे षट्समुद्देशेषु २१२ सूत्राणि वर्तन्ते । प्रमाणनयतत्त्वालोकेऽष्टसु परिच्छेदेषु ३७८ सूत्राणि संकलितानि सन्ति । श्वेताम्बरदिगम्बराणां दर्शनान्तरे[28] प्रायः प्रमाणसिद्धान्तसाम्यात् प्रमाणस्य लक्षण-संख्या-विषय-फल-तदाभासादीनां [29] सूत्रपद्धतेश्च साम्यं द्वयोरपि ग्रन्थयोर्भवेन्नाश्चर्यकारि । एतन्मात्रं समीक्ष्य कोऽपि दुस्साहसात् यदीत्थं कथयेद् यद् 'वादिदेवसूरिणा परीक्षामुखात् सूत्राणि संगृहीतानि तद्रचनाकौशलं वा तस्मादासादितमिति' तदा तस्य तद् दुःसाहसप्रजल्पितं नाम कक्षीकरणार्हं प्रेक्षादक्षाणाम् । न हि किञ्चित्साधर्म्यमात्रेणैव तत्संग्रहस्तदनुकरणता वा सिध्यति, अतिप्रसङ्गात्, अन्यथा जैनेन्द्रप्रक्रियादिव्याकरणग्रन्थेष्वपि पाणिन्यादिसूत्रसादृश्यदर्शनात् तत्रापि पाणिनीयव्याकरणादित. तत् सूत्रसंग्रहानुकरणतापत्तिः कथं न स्यात्? तुल्ययोगक्षेमत्वात् । किंचानेकवादिजिष्णुर्धिषणानिराकृतधिषणधिषणश्चतुरशीतिसहस्रश्लोकात्मकस्याद्वादरत्नाकरमहावादग्रन्थस्य रचयिता श्रीवादिदेवसूरिरपरस्य सूत्राणि तद्रचनाकौशलं वा गृह्णीयादिति क. खलु कोविद. श्रद्दधीत ?

28 शेषं श्वेताम्बरैस्तुल्यमाचारे दैवते गुरौ ।
श्वेताम्बरप्रणीतानि तर्कशास्त्राणि मन्वते ॥ २७ ॥
स्याद्वादविद्याविद्योतात् प्राय. साधर्मिका अमी ॥ २८ ॥
—राजशेखरीयषड्दर्शनसमुच्चयः ।

29 संस्कृतभाषायां सर्वतः प्रथमसुमास्वातिपादै सूत्रनिर्माणपद्धतिरादृता ।

अस्य ग्रन्थस्य नामधेयम्।

श्रीवादिदेवसूरिणा सूत्ररूपो यो ग्रन्थो ग्रथितस्तस्य "प्रमाणनयतत्त्वालोकालङ्कारः" इति नाम साम्प्रतं सर्वत्र प्रसिद्धमास्ते, परन्तु तन्न युक्तम्, यतो ग्रन्थकर्त्रा त्वस्य 'प्रमाणनयतत्त्वालोकः' इत्येव नामधेयं स्थापितमित्यस्यैव ग्रन्थस्य विस्तृतस्वोपज्ञटीकारूपस्याद्वादरत्नाकरग्रन्थान्तःपाठतः स्पष्टं प्रतिभासते। तथाहि—"कथं पुनः प्रमाणनयतत्त्वालोकः शास्त्रं ? येन तदाऽऽरम्भे परम्परागुरुप्रवाहः स्मर्यते, इति चेत्, उच्यते,.... ...." "तच्चाष्टपरिच्छेदीरूपस्य प्रमाणनयतत्त्वालोकस्यास्तीति सोऽपि शास्त्रम्"—स्याद्वादरत्नाकरः १ परि०, १ भागः, पृ० ७ आर्हतमतप्रभाकरमुद्रितः। तथा—

"इदं स्वसंवेदनप्रत्यक्षेणान्तस्तत्त्वरूपतया प्रतिभासमानं प्रमाणनयतत्त्वालोकाख्यं शास्त्रम्"-स्याद्वादरत्नाकरप्रथमभागः, पृष्ठं ६। श्रीवादिदेवसूरेः प्रियतमशिष्यश्रीरत्नप्रभसूरिः स्याद्वादरत्नाकरसाररूपा रत्नाकरवतारिका टीका रचयाञ्चक्रे, सोऽपि तस्यां प्रस्तुतग्रन्थस्य "प्रमाणनयतत्त्वालोकः" इत्येव नाम प्रकटीचकार, तथाहि—"सोऽपि समानतः सूत्राभिधेयावधारणं विना न; इति प्रमाणनयतत्त्वालोकाख्यतत्सूत्रार्थप्रकाशनपरा रत्नाकरावतारिका नाम्नी लघीयसी टीका प्रकटीक्रियते।"

रत्नाकरावतारिका यशोवि० ग्रन्थमालामुद्रिता पृ० २।

शब्दार्थेऽपि विचार्यमाणे प्रमाणनययोस्तत्त्वं; तस्यालोकः प्रकाश इति **'प्रमाणनयतत्त्वालोकः'** इत्येवास्य पर्याप्तं युक्तं नाम प्रतिभासते। 'आलोकस्यालङ्कारः' इति नाम तु निरर्थकं विशिष्टार्थं वा प्रतिभाति। यद्यपि मुद्रितस्याद्वादरत्नाकर प्रथमपरिच्छेदान्ते [illegible] **"इति श्रीदेवाचार्येण विरचिते स्याद्वादरत्नाकरे प्रमाणनयतत्त्वालोकालङ्कारे प्रमाणस्वरूपनिर्णयो नाम प्रथमः परिच्छेदः ॥ १ ॥"** इति पाठो दृश्यते, पर [illegible] उपसंहारोल्लिखभेदस्तु लिपीकारविहितोऽपि [illegible], [illegible], [illegible] **'प्रमाणनयतत्त्वालोकः'** [illegible]। [illegible] निर्दिष्ट ग्रन्थकारपाठस्य निरा[illegible] **प्रमाणनयतत्त्वालोक** इत्येव ग्रन्थकार [illegible], [illegible]।

[illegible] रत्नाकरावता[illegible] [illegible] परिच्छेदान्ते, तथा प्रमाणनय [illegible] प्रमाणपरिच्छेदान्ते [illegible] "श्रीप्रमाणनयतत्त्वालोक" इति पाठो [illegible] [illegible] [illegible] पृ० २४०।

निर्बाधमिदं सिध्यति यत् प्रस्तुतग्रन्थस्य 'श्रीप्रमाणनयतत्त्वालोकः' इत्येव नामधेयं श्रीवादिदेवसूरिभिर्विहितम्, न 'प्रमाणनयतत्त्वालोकालङ्कारः' इति। किञ्च विद्वद्ग्रन्थनामानि प्रायः संक्षिप्तानि भवन्ति।

या च प्रसिद्धिरलङ्कारान्तस्य जाता, सास्य ग्रन्थस्य श्रेष्ठतमत्वात् "अलङ्कारभूतोऽयं ग्रन्थो न्यायग्रन्थेषु" इतिलोकप्रतीतिहेतोः, लिपीकारस्य वा भ्रान्त्या समजनीति संभाव्यते। यथा—दिगम्बराणां तत्त्वार्थाधिगमसूत्रविधातुः श्रीउमास्वातिपादस्य श्रीउमास्वामित्वेन प्रसिद्धिर्जाता, सा च बहुकालतो भ्रान्तिसंभवेति साधितं सप्रमाणं दिगम्बरपण्डितश्री[31]जुगलकिशोरादिमहाशयैः, तद्वदत्रापि वेदितव्यमिति मामकी मतिः। अत एव मया अस्य ग्रन्थस्य सम्पादनावसरे 'श्रीप्रमाणनयतत्त्वालोकः' इत्येव नामधेयं मुद्रापितम्।

प्रमाणनयतत्त्वालोकस्य प्रचारः।

अस्य ग्रन्थस्य बाह्याभ्यन्तराऽऽकारेण सुन्दरत्वाद् जैनप्रमाणनयतत्त्वस्य सम्पूर्णतया प्रतिपादकत्वाद् विस्तृतपद्धतिकत्वेऽपि गंभीरार्थत्वाच्च बहुभिर्विद्वद्भिरस्य ग्रन्थस्याध्ययनाध्यापनमनुकरणं

31। अनेकान्तपत्रे, १ वर्षस्य, ४ किरणे पृ० २६६।

टीका रचयाञ्चक्रे। चतुर्विंशतिप्रबन्धकारैः श्रीराजशेखरसूरिभिः [37]रत्नाकरावतारिकोपरि पञ्जिका, ज्ञानसुन्दरेण च टिप्पणं व्यधायि। शास्त्रविशारदश्रीविजयधर्मसूरिमिश्रैः प्रमाणपरिभाषायां प्रस्तुतग्रन्थानुकृतिरपि कृता।

ग्रन्थकारवादिदेवसूरिपरिचयः।

अस्य श्री प्रमाणनयतत्त्वालोकस्य कर्तुर्विषये सत्यपि मत्पार्श्वे साधनप्राचुर्ये प्रस्तावनागौरवभयादेवातीव संक्षेपादत्र किञ्चिल्लिख्यते—

श्रीवादिदेवसूरेः 'वीरनाग' इति जनकः, 'जिनदेवीति' जननी, 'पूर्णचन्द्र' इति नामधेयम्, अष्टादशशतीदेशभूषणं 'मद्दाहृतम्' इति नगरम्, 'प्राग्वाट' (पोरवाड) इत्याख्यातैश्य-जातिः, जन्मतो जैनधर्मश्चासीत्[38]। बृहत्तपागच्छीययशोभद्रनेमि-

[34] अनेन ज्ञायते यदयं ग्रन्थः प्रमाणनयतत्त्वालोकसूत्राण्यवलम्ब्यैव विरचित इति। [35]जैनसप्तपदार्थीग्रन्थोऽपि श्रीयशस्वसागरेण निरमायि। प्रमाणप्रमेयकलिकानामकोऽयं सुन्दरो ग्रन्थस्तर्कसंग्रहपद्धतिकोऽस्ति; स चेत् प्रकाशितो भवेत्तदा दर्शनशास्त्रप्रवेशोत्सुकच्छात्राणामतीवोपकारी स्यात्. अस्य प्रमाणप्रमेयकलिकायामपि कानिचित् प्रमाणनयतत्त्वालोकसूत्राणि दरीदृश्यन्ते। [36]अयं पञ्चभागैरपूर्णो ग्रन्थः श्रीआर्हतमतप्रभाकरकार्यालयेन पूनानगरात् प्रकाशितः। [37]रत्नाकरावतारिका संपूर्णा, परिच्छेदद्वयस्य पञ्जिका, टिप्पणं च श्रीयशोविजयग्रन्थमालया प्रकाशयाञ्चक्रिरे।

[38]प्रभावकचरित्रे देवसूरिप्रबन्धे।

चन्द्रपट्टालङ्कारश्रीमुनिचन्द्रसूरिपार्श्वे पूर्णचन्द्रेण ११५२ वैक्रमे वर्षे साधुदीक्षा जगृहे। स्तोकेन कालेन विविधाः शास्त्रकलाः कलयित्वा स काश्मीरसागर-गुणचन्द्रादीन् नैकान् तत्कालख्यातान् वादिनो वादेषु पराजितवान्। गुरुणा तद्वादशक्त्या संतुष्य विद्वत्संघसमक्षं ११७४ वैक्रमे 39वर्षे 'देवसूरिः' इति नाम प्रख्याप्य तस्मै आचार्यपदं प्रददे।

अथ 40गुरुनिर्वाणानन्तरं स देवसूरिरनेकान् भूपतीन् प्रतिबोध्याऽसंख्यान् संख्यावतोऽगण्यान् जनगणान् शुद्धोपदेशेनोपादिश्य गुर्जर-मरु-मेवाडादिदेशेषु निस्पृहो विचचार।

वादशक्तिपरिचयः।

देवसूरावपूर्वो वादशक्तेर्विकास आसीत्, येन बह्वीषु वादसभासु स विजयश्रियं ववार। तत्र प्रसङ्गद्वयं लिख्यते—

---

39 शिखिवेदशिवे (११४३) जन्म, दीक्षा युग्मशरेश्वरे (११५२)।
वेदाश्वशङ्करे (११७४) वर्षे सूरित्वमभवत् प्रभोः॥ श्लो० २८६।
प्रभा० च० देवसूरिप्रबन्धः।

धर्मसागरोपाध्यायमतेन तु वि० ११३४ वर्षे सूरेर्जन्माभवत्।

40 श्रीमुनिचन्द्रसूरेर्वि० ११७८ कार्तिककृष्णपञ्चम्यां निर्वाणमभूदिति देवसूरिरचितगुरुविरहविलापस्य ३६, ४० श्लोकाभ्यां विज्ञायते।

एकदा किल देवबोधनामा सर्वतन्त्रस्वतन्त्रः कश्चिद् भागवतदर्शनी पण्डितः श्रीपत्तननगरं (पाटण) आगत्य राजद्वारेऽवलम्बनपत्रे एकं दुरवबोधं श्लोकं लिलेख। तं श्लोकं दृष्ट्वा सर्वेऽपि राजपण्डिताः विस्मयं जग्मुः। पश्यामान् यावद् व्याख्यातुं कृतेऽपि प्रयत्ने केनापि कोविदेन स श्लोकः न स्पष्टं व्याख्यात इति हेतोरेतस्मिन् विकटेऽवसरे सिद्धराजजयसिंहनाम्ना गुर्जरसम्राट्, [41]अम्बाप्रसादाख्येन सचिवेन च विज्ञप्तो यद् देवसूरिरस्यार्थं स्पष्टयिष्यतीति। तदनन्तरं राज्ञा प्रार्थितो देवसूरिस्तस्य श्लोकस्य लीलयैव स्पष्टव्याख्यां चकृवान्। स चायं श्लोकः—

[42]एकद्वित्रिचतुःपञ्चषण्मेनकमनेनकाः।
देवबोधे मयि क्रुद्धे षण्मेनकमनेनकाः॥

अस्य श्लोकस्य स्पष्टं व्याख्यातुः बृहस्पतेरिव देवसूरेः प्रतिभां प्रेक्ष्य राज्ञा सह सर्वेऽपि पण्डिताः प्रमोदमेदुराः संजज्ञिरे। देव-

---

41 प्रभावक चरित्रम् ॥ ६२ ॥

42 प्रभावकच० श्लो० ६३। अस्य श्लोकस्य संक्षिप्तं तात्पर्यमत्र लिख्यते एक-द्वि-त्रि-चतु पञ्च-षट्प्रमाणोपदेशिभिर्वादिभिरुच्यते मयि देवबोधनाम्नि पण्डिते कुपिते सति ते एकादिप्रमाणवादिनश्चार्वाक-बौद्ध-साङ्ख्य नैयायिक-प्रभाकर-मीमांसका न का –न वादिन , तुच्छा इत्यर्थः। तथा विष्णु-ब्रह्म-सूर्या अपि वादिनो मयि क्रुद्धे सति नका: कुत्सिता ,-तेऽपि ममाग्रे निरुत्तरी-भवन्तीतिभाव , यतो देवान् बोधयतीति व्युत्पत्त्याऽहं तेषामपि बोधको-ऽस्मीति।

बोधोऽपि प्रीतः । यदा देवसूरिर्मरुदेशस्थनागपुरं पुरं जगाम तदा आह्लादनाख्येन भूपेन सहाभिमुखमागत्य देवबोधो देवसूरिं स्तुतवान्—

यो वादिनो ⁴³द्विजिह्वान् साटोपं विषममानमुद्गिरतः ।
शमयति स देवसूरिर्नरेन्द्रवन्द्यः कथं न स्यात् ॥ १ ॥

—प्रभावकच० दे० प्र० ७८ ॥

वादिकुमुदचन्द्रेण सह वादः ।


श्रीदेवसूरिर्यदा कर्णावतीं गत्वा वर्षाचतुर्मासीं तस्थौ । तदा जयकेशिदेवाख्यस्य कर्नाटनृपतेर्गुरुर्जितानेकसभो मदोद्धुरः कुमुदचन्द्रनामा दिगम्बरवादी अपि तत्र तस्थिवान् । विविधरुपायैः कुमुदचन्द्रो देवसूरिं वादाय उत्तेजितवान् । शान्ताऽऽत्मापि देवसूरिस्तन्मदविनाशाय श्रीपत्तने गुर्जरराजसभायां वादं विधातुं प्रतिज्ञाय कुमुदचन्द्रं च प्रेर्य शुभे शकुनजाते मुहूर्ते पद्भ्यां प्रयाय पत्तनमाजगाम ।

---

43 सर्पाणां राज्ञां च शमने समानधर्मत्वं, मुद्राराक्षसे विशाखदत्तेन द्वितीयाङ्के प्रोक्तं तद् यथा—

जाणंति तन्तजुत्तिं जहट्ठिअं मंडलं अहिलिहन्ति ।
जे मन्तरक्खणपरा ते सप्पणराहिवे उवअरन्ति ॥ १ ॥

देवसूरिप्रयाणकुण्डली ।[41]



कुमुदचन्द्रोऽपि पत्तनमाजिग्मवान् । तत्र श्रीसिद्धराजे सभा-
र्ता सति, ११८१ वैक्रमे वर्षे वशाखपूर्णिमा दिने तयोर्वादारम्भः
बभूव । पणबन्धश्चायमजनि—

41 प्रयाणग्रहप्रतिपादक श्लोकस्त्वत्र प्रभावकचरित्रे—

तत. सूरिर्दिने शुद्धे स्वेपलग्ने रवौ स्थिते ।
सप्तमस्थे शशाङ्के च षष्टे राहौ रिपुष्टहि ॥ १३६ ॥

अनेन श्लोकेन ज्ञायते यद्देवसूरिणा चैत्रशुक्लपूर्णिमायां तत्समीपवर्तिनि
ा दिने प्रात प्रयाणमकारीति ।

[illegible] ।

१-[illegible] शालो [illegible] ।

२-[illegible] साह [illegible] ।

सभ्याः ।

१-कुमुदचन्द्रपक्षीया [illegible] आसन् ।

२-सभापतिपक्षीयाः [illegible], [illegible], [illegible] इति [illegible] नलयो [illegible] ।

३-देवसूरिपक्षीयाः कविचक्रवर्ति श्रीपाल , भानुश्चासीत् ।

वादिप्रतिवादिसिद्धान्तः ।

पक्षः ।	वादिकुमुदचन्द्रस्य ।	देवसूरेः ।
स्त्रीमुक्तिः ।	न भवति ।	भवति ।
केवलिभुक्तिः ।	,,	,, ।
सवस्त्रस्य मुक्तिः ।	,,	,, ।

वादिप्रतिवादिसभ्यसभापतिषु स्मस्तेषु वादाङ्गेषु सभामलङ्कुर्वत्सु "भवान्तावत्स्वपक्ष कक्षीकरोतु" इति देवसूरावुक्ते

इति दिगम्बराचार्यं कुमुदचन्द्रो राज्ञे प्रथममाशिषं ददौ। तद्यथा—

खद्योत द्युतिमातनोति सविता जीर्णोर्णनाभालय-
च्छायामाश्रयते शशी मशकतामायान्ति यत्राद्रयः।
इत्थं वर्णयतो नभस्तव यशो जातं स्मृतेर्गोचरं,
तद्यस्मिन् भ्रमरायते नरपते! वाचस्ततो मुद्रिताः॥

पश्चाद् देवसूरिरपि सुन्दर श्लिष्टार्थमाशिषं वितीर्णवान्। तद्यथा—

नारीणां विदधाति निर्वृतिपदं श्वेताम्बरप्रोन्मिषत्-
कीर्तिस्फाति मनोहरं नयपथप्रस्तारभङ्गीगृहम्।
यस्मिन्केवलिनो न निर्जितपरोत्सेकाः सदा दन्तिनो,
राज्यं तज्जिनशासनं च भवतश्चौलुक्य! जीयाच्चिरम्॥

वादारम्भः।

ततः पराभवशङ्कातङ्कुलितान्तःकरणः कुमुदचन्द्रः स्वपक्षस्थापनाय स्त्रीमुक्तिकेवलिभुक्तिसवस्त्रमुक्तिप्रतिषेधकं पक्षोपन्यासं कृतवान्। अथ तत्पक्षस्थापनानन्तरं सभापतिप्रार्थितः श्रीदेवसूरिः प्रतिवदितुमारेभे। प्रथमं तु देवसूरिणा कुमुदचन्द्रोपन्यस्तपक्ष-साधनादीनि पर्वतशिखराणीव महातार्किक शान्तिसूरिविरचितोत्तराध्ययनसूत्रवृत्तिमनुसृत्य सत्तर्ककर्कशैश्चतुरशीति विकल्पयुक्ति जाल

वज्रैरनेकधा खण्डितानि। अस्खलितं तं खण्डनप्रकारमवधारयितु-मप्यक्षमः संभ्रान्तचेताः कुमुदचन्द्रः "पुनरुच्यताम्" इति देवमूरिं प्रोक्तवान्। देवसूरिः सम्पूर्णमपि स्वोपन्यासं त्रिवारमावृत्तवान्। ततः उत्तरदानेऽनुत्पन्नप्रतिभः कुमुदचन्द्रो निस्तेजाः सन् मौनं बभार। सभापतिनासभ्यैश्च "देवसूरिणा कुमुदचन्द्रो जितः" इत्यनेकवारं हर्षितालापूर्वकमुद्घोषितम्। सर्वथा परास्तोऽपि दिगम्बराचार्यः कुमुदचन्द्र स्वकीर्तिरक्षणाय "भवदुपन्यासे प्रोक्ता-कोटाकोटि, काटेकोटि 45 कोटी कोटि, इति शब्दाः अशुद्धाः, अतः अपशब्दाख्य निग्रहस्थानेन निगृहीतो भवान् इत्युवाच। तच्छ्रुत्वा महावैयाकरणेन देवसूरिणा लक्षणसूत्रपुरस्सरमेते त्रयोऽपि शब्दाः संसाधिता। उत्साहाख्येन विदुषा सभ्येनापि चैते शब्दाः पाणिनेः संमता इत्यनुमोदितम्। तेन स कुमुदचन्द्रः स्वयं निर-नुयोज्यानुयोगाख्येन निग्रहस्थानेन निगृहीतः पराजयं प्राप्यातितरां लज्जे।

राजा सहर्षं धन्यवादप्रदानपूर्वकं देवसुरेर्विजयमसकृत् घोषयाञ्चकार। कुमुदचद्रस्य च देशत्यागमादिदेश। वादसमाप्त्य-नन्तर जयपत्रं (Testimony of victory) सम्यग् लेखयित्वा स्वहस्ताक्षरैरलङ्कृत्य बहुमान पूर्वकं श्रीदेवसुरये ददौ। पारितोषिक

45 प्रभावकच० मतेन कोटिकोटीशब्दोऽयम्। उत्साहस्थाने काक-योल्लेखो प्रबन्धचिन्तामणौ वर्तते।

[illegible] ... [illegible] निरूप- [illegible] ... [illegible] [illegible] ... [illegible]।

[illegible] ... सन्ति [illegible]।

ग्रन्थरचना।

[illegible] ... प्रकरण- [illegible] ... [illegible] ... [illegible] ... [illegible]। [illegible] ... "प्रमा- [illegible] ... [illegible] ... प्राज्- [illegible] ... ग्रन्था [illegible]। निपुणा-

---

[illegible] ... [illegible] रत्नाकरो महान्।

—रत्नप्रभसूरि।

"स्याद्वादरत्नाकर इत्यस्ति तर्को महत्तम।"

—राजशेखरसूरिः।

"कान्ताननेवान्नगतारतनाभिन स्याद्वादरत्नाकरयाप्य यादिकान्।"

—हेमविजयो गणि।

यस्मिन्नितानेकयुग्रिच्यतिवराग्निलोदग्दडदडकस्कारपूत्तोत्करासुरत्नरला- करस्याद्वादरत्नाकरप्रमुनाऽनेकमत्तर्कग्रन्थावली का कां न चमत्करीकरोति कोविदावलीम् "।

—मुनिसुन्दरसूरि।

न्वेषणानन्तरं निम्नोक्ता देवसूरेर्ग्रन्था अस्माभिर्दृष्टाः श्रुताश्च त इमे-

देवसूरिग्रन्थाः ।

*१ प्रभाते जीवानुशासनम् ।	† ७ कलिकुण्डपार्श्वजिनस्तवनम्
* २ मुनिचन्द्राचार्य स्तुतिः ।	८ यतिदिनचर्या (जैनध"
* ३ गुरुविरहविलापः ।	९ जीवाभिगमलघुवृत्तिः("
* ४ द्वादशव्रतस्वरूपम् ।	×१० उपधानस्वरूपम् ।
† ५ कुरुकुल्लादेवीस्तवनम् ।	×११ प्रभातस्मरणस्तुतिः ।
† ६ श्री पार्श्वधरणोरगेन्द्रस्तवनम् ।	+१२ उपदेशकुलकम् ।
	+१३ संसारोद्विग्नमनोरथकुलकम् ।

स्याद्वादरत्नाकरनामधेय ग्रन्थ महान्त विबुध वयेरम् ।
कृत्वा यशोमानमवाप यत् तत् श्रीदेवसूरेर्नहि भाति लोके ॥सं०॥
सिद्धान्त पथ्यादिना हि बहुश संशोध्य तत्पुस्तकं
पश्चाद्वेदपराग्रणीर्जिनमतैर्युक्त्याऽनवद्यादिभि ,
यत् सूर्य इवाभेदमहसा सन्नाशयत्यादितो
देवाचार्यकृतो नवो विजयतां स्याद्वादरत्नाकर. ॥ -संशोधक ।

[illegible]विजयगणिभिरपि सूरिन्याय[illegible] (पृ० १०) स्या[illegible] रत्नाकर निर्दिदिशु ।

* [illegible] ग्रन्था प्रकरणसमुच्चये (इं० स० १९२३) मुद्रिता सन्ति ।

† इमे निर्दिष्टा ग्रन्था मुनिश्रीचतुरविजय संपादिता ।

× इमौ [illegible] ग्रन्थौ [illegible]मुनिभिर्दत्तौ ।

+ इमौ [illegible] ग्रन्थौ [illegible]ग्रामभाण्डागारे वर्तेते ।

वादिदेवसूरे राजप्रतिबोधकत्वम्।

नागपुरीय आह्लादननृप, सिद्धराजजयसिंहभूप, कुमारपाल-पृथ्वीपाल इत्यादयो नेके नृपतय सूरिणा उपदिष्टा इति ज्ञायते।

वादिदेवसूरेः शिष्याः।

तेषा बहवः शिष्या संबभूवु। तेषु ज्ञातनामानस्त्वेते—

१ [47]भद्रेश्वरसूरिः। (पट्टधर.)	६ [48]पूर्णदेवाचार्यः।
२ [47]रत्नप्रभसूरिः।	७ [49]जयप्रभः।
३ माणिक्य। (मु० कुमुदचन्द्रे)	८ [50]पद्मचन्द्रगणिः।
४ अशोकः। (,,)	९ [51]पद्मप्रभसूरिः।
५ विजयसेन। (,,)	१० [52]महेश्वर।

---

47 एतो द्वौ शिष्यौ वादिदेवसूरिणा स्याद्वादरत्नाकरे सहायकत्वेनोल्लिखितौ, स्याद्वादरत्नाकरस्य प्रथमपरिच्छेदान्ते (श्लो० २६४) तथाहि-भद्रेश्वर-प्रवरयुक्तिसुधाप्रवाहो रत्नप्रभश्च भजते सहकारिभावम्॥

48 जालोरदुर्गस्थकाञ्चनगिरिशिलालेख, सं० १२२१ वैक्रमीय.।

49 प्रबुद्धरौहिणेयनाटके श्लो० ५।

50 प्राचीनलेखसंग्रह।

51 चन्द्रकीर्त्तिकृतसारस्वतटीकाप्रशस्तिश्लो० ३ गवर्नमेन्ट१० पृ०१७५

52 श्रीजिनविजयलिखिता कुमारपालप्रतिबोधप्रस्तावना पृ० ३,

आव

११ [53]गुणचन्द्रः ।
१२ शालिभद्रः (गच्छमतप्र०)
१३ जयमंगलः । (वृत्तरत्ना टीकायाम्)
१४ [54] रामचन्द्रः

देवसूरिसमकालीनविद्वांसः ।

१ हेमचन्द्रसूरिः ।
२ रामचन्द्रसूरिः (हेम० शिष्य.)
३ गुणचन्द्रसूरिः (,,)
४ उदयचन्द्र. (,,)
५ जिनचन्द्रसूरिः (ख० ग०)
६ जिनदत्तसूरि. (खरतर ग०)
७ जिनपतिसूरिः (,,)
८ जिनवल्लभसूरिः (,,)
९ जिनभद्रसूरिः ।
१० चन्द्रप्रभसूरिः ।
११ हरिभद्रसूरिः (नेमिच० कर्ता)
१२ चन्द्राचार्यः ।
१३ आनन्दसूरिः ।
१४ अजितदेवसूरिः (गुरुभ्र
१५ विजयसिंहसूरिः ।
१६ धर्मघोषः ।
१७ कमलकीर्तिः ।
१८ श्रीपाल. (श्रावकः
१९ यशःपालः (,,
२० वाग्भटः (मंत्री ,,
२१ यशोवीरः(,, ,,
२२ उदयनः (,, ,,
२३ कुमारपालो भूपः ।
२४ सिद्धराजजयसिंहो भूपः ।

---

53 हैमविभ्रमटीकाकारः, तत्-प्रशस्तिश्लो० १ ।

54 Ipigraphia Indica vol. ix. P. 79.

वादिदेवसूरेर्मित्राणि।

55विमलचन्द्र–हरिचन्द्र–सोमचन्द्र–पार्श्वचन्द्र–कुलभूषण–शान्ति–अशोकचन्द्रादयो विपश्चितो देवसूरेर्मित्राणि बभूवुः।

देवसूरेरन्यत् कार्यजातम्।

१ धवलके उदयकारितसीमंधरमूर्तिप्रतिष्ठा । 56

२ पत्तने महाकविवाग्भटकारितमन्दिरे वीरजिनमूर्तिप्रतिष्ठा । 57

३ पत्तने सिद्धराजभूपकारितमन्दिरे श्रीऋषभजिनप्रतिष्ठा 58

४ फलवर्द्धिग्रामे जिनचैत्यबिम्बयोः प्रतिष्ठा कृता । 58

५ आरासणे ग्रामे नेमिनाथजिनमूर्तिप्रतिष्ठा । 59

---

55 प्रभावकच० दे० प्रबन्ध श्लो० ४३ । ४४ ।

56 प्रभावकच० दे० प्र० श्लो० ५२

57 विक्रम सं० ११७६, प्रभावकच० दे० प्र० ७३, अनेनविपश्चिता मन्त्रिणा वाग्भटालङ्कारो रचितो योऽद्यावधि सर्वत्राप्यधीयते ।

58 प्रभावकच० देवसूरिप्रबन्ध श्लो० २७५ । इय प्रतिष्ठा वि० ११८३ वैशाखद्वादशीतिथौ चतुर्भिस्सूरिभिश्चक्रे वादजयतुष्टराजदत्तवित्तेन ।

59 तपागच्छपट्टावल्यां श्रीधर्मसागरोपाध्याया प्रोचु ।

यत्तु गच्छमतप्रबन्धकर्त्रा (पृ० १४२) फलवर्द्धि-आरासण-जिनबिम्बप्रतिष्ठाकर्तृत्वेन, स्याद्वादरत्नाकररचयितृत्वेन च श्रीअजितदेव-

श्रीमद्देवगुरौ सिंहासनस्थे सति भास्वति
प्रतिष्ठाया न लग्नानि वृत्तानि महतामपि ॥ प्रभाचन्द्रसूरिः ॥
वादीन्द्रस्मयदलनप्रत्यग्रचणः श्रीदेवसूरिः प्रभुः ॥रामभद्रमुनिः॥
कृत्वा ग्रन्थान् चारुतत्त्वार्थपूर्णान्
  विद्वन्मान्यान् दुर्धियां भीतिहेतून् ।
लब्ध्वा मानं सर्वविद्वत्सभासु
  ख्यातामिख्यो देवसूरिर्बभूव 61 ॥ सम्रोधकः ॥

वादिदेवसूरिनिर्वाणम् ।

एवं वादोपदेशसवन्या चेतस्विचेतश्चमत्कारिग्रन्थरचनया गुणिगणगण्यगुणगणेन च प्राप्तपुण्ययशा देवसूरिः 62 भद्रेश्वरसूरये गच्छभारं समर्प्य ८३ वर्षमितमायुः संपाल्य समाधिपूर्वकं विक्रमीये १२२६ वर्षे श्रावणकृष्णसप्तम्यां तिथौ मर्त्यलोकं विहाय अमर्त्यलोकमलङ्करोति स्मेति वादिदेवसूरिचरित्रसंक्षेपः ।

टिप्पणीपरिचयः ।

राजकीयकलकत्ताऽऽदिमहाविद्यालयेषु (University) M. A. परीक्षायां, न्यायप्रथमादिपरीक्षासु, अन्यासु बह्वीषु पाठशालासु च पाठ्यग्रन्थत्वेनायं ग्रन्थो निर्धारितोऽस्ति, अतः

---

61 अयं श्लोकः सुभाषितरत्नभाण्डागारे कविप्रशंसायां मुद्रितः । पृ० २८९ ।
62 प्रभावकच० दे० प्र० श्लो० २८२ । २८४ । २८७ ।

दरत्नाकरान्तरमुद्रितग्रन्थेषु च प्राय. प्रत्येकसूत्रप्रान्ते "इति" इति पदं मुद्रितं दृश्यते,[63] परन्तु विचार्यमाणाया सूत्रपद्धत्यां सुत्रपद्धत्या च सर्वत्र "इति" इति पदं निरर्थकमसुन्दरञ्च प्रतिभाति। केषुचिद् मुद्रितपुस्तकेषु हस्तपुस्तकेषु च सर्वत्र "इति" पदस्यानुपलब्धेरस्माभिर्नात्र तत् सम्पादितम्। यत्र तु रत्नाकरावतारिकायामावश्यकत्वाद् वर्तते तत्तु अस्मिन्सपादनेऽपि [64]मुद्रितमेव यथास्थानम्। पिपाठिषूणां यथावश्यकं च तत्र तत्र स्थले पत्राधोभागेऽस्माभिः टिप्पणानि संदृब्धानि। आग्रास्थश्रीविजयधर्मलक्ष्मीज्ञानमन्दिरस्य हस्तलिखितपुस्तकद्वयात् पाठान्तराणि, विषयानुक्रमश्च यद् यदावश्यकतया प्रतिभातं तत् तदत्र यथास्थानं नियोजितम्। यद्यत् सूत्रं टिप्पणीरहितं तत्र तत्र सूत्रद्वयभेदसूचकानि * ⁂ ⁂ ⁂ ⁂ इति मध्ये चिह्नानि कृतानि।

अस्य ग्रन्थस्य सम्पादने प्रस्तावनादिलेखने वा मया ये ये ग्रन्था उपयुक्तास्तेषां ग्रन्थकारेभ्यः प्रकाशकेभ्यो हस्तपुस्तकदायकेभ्यश्च नैकशो धन्यवादान् वितरामि। सम्पूर्णेऽप्यत्र ग्रन्थे मम प्रमादाद्; मुद्रकाज्ञानदोषाद्वा यत् किंचित् स्खलनं दृश्येत तत् शुभवाञ्छिभिर्भवद्भिः संशोध्य क्षन्तव्योऽयं जनः, सूचयितव्यश्चेत्यभ्यर्थयते।

---

63 यथा—"प्रमाणनयतत्त्वव्यवस्थापनार्थमिदमुपक्रम्यते इति॥ १–१॥ स्वपरव्यवसायिज्ञानं प्रमाणमिति॥ २॥ इत्यादि। 64 यथा परि० ४-२१, प० ६-२६, परि० ७-१०,।

मूलग्रन्थस्य विषयानुक्रमः ।



श्रीदेवसूरिर्निजबुद्धिशक्त्या जिष्णुर्गुणित्वेन च देवसूरिम् ।
ध्याधिदेव स्मृतिवर्त्म तावत्सयं नयी ग्रन्थमुपक्रमेत ॥ १ ॥

प्रथमे परिच्छेदे ।

प्रमाणलक्षणं सम्यक् परीक्ष्यार्थस्वरूपणम् ।
प्रामाण्यमादिमे चोक्तं परिच्छेदे सुयुक्तितः ॥ २ ॥

द्वितीये परिच्छेदे ।

भित्वादौ प्रमितिं द्वेधा प्रत्यक्षं च सलक्षणम् ।
तद्भेदान् प्रोच्य लौकिकाऽलौकिकाश्चालिखत्तत. ॥ ३ ॥

तृतीये परिच्छेदे ।

सस्वरूपाः परोक्षस्य पक्षोपलब्धिलक्षिता ।
सानुपलब्ध्युदाहारास्तृतीयेऽकथयद्भिदा. ॥ ४ ॥

चतुर्थे परिच्छेदे ।

मुख्यत्वात्तु श्रुताऽऽख्यस्याग्रथनात्तुर्ये पृथक् श्रुतम् ।
आप्त-वर्णपदार्दांश्च सप्तभङ्गीमवर्णयत् ॥ ५ ॥

श्रीप्रमाणनयतत्त्वालोके विस्तृतो विषयानुक्रमः।

प्रथमे परिच्छेदे

द्वितीये परिच्छेदे

श्रीवादिदेवसूरिविरचित.

* प्रमाणनयतत्त्वालोकः *

प्रथमः परिच्छेदः ।



ग्रन्थकारस्य मङ्गलाचरणम्—

रागद्वेषविजेतारं ज्ञातारं विश्ववस्तुनः ।
शक्रपूज्यं गिरामीशं तीर्थेशं स्मृतिमानये ॥१॥

टिप्पणीकारस्य मङ्गलाचरणम्—

नत्वा गुरुक्रमाम्भोजं स्मृत्वा सर्वेश्वरं विभुम् ।
टिप्पणी बालबोधाय लिख्यते बालभाषया ॥ १ ॥

अथ तत्रभवन्तः पूज्य-पादाः सकलकवितार्किकचक्रच-क्रवर्त्तित्वेन विश्रुताः श्रीवादिदेवसूरयः प्रारिप्सितग्रन्थ-निर्विघ्नपरिसमाप्तये इष्टदेवतानमस्कारात्मकं कृतं मङ्गलं शिष्यशिक्षार्थं ग्रन्थादौ निबध्नन्ति राग-द्वेषेति—

भावात्। लक्ष्यवृत्तित्वे सत्यलक्ष्यवृत्तित्वमतिव्याप्तिः, यथा 'शृङ्गित्वं गोर्लक्षणम्' इत्युक्ते महिषादावतिव्याप्तिः, शृङ्गित्वरूपधर्मस्य तत्रापि विद्यमानत्वात्। लक्ष्यमात्रावृत्तित्वमसम्भवः, यथा 'एकशफवत्त्वं गोर्लक्षणम्' इत्युक्ते गोमात्रस्यैकशफवत्त्वाभावादसम्भवः। सास्नादिमत्त्वं गोत्वमिति तु दूषणत्रयरहितं लक्षणम्।

एवमिदमपि प्रमाणलक्षणं दूषणत्रयरहितत्वान्निरवद्यं, तथाहि-प्रमाणमात्रे लक्षणस्य सत्त्वान्नाव्याप्तिः, अप्रमाणतो व्यावृत्तत्वान्नातिव्याप्तिः, लक्ष्यमात्रे लक्षणस्य विद्यमानत्वादेव नासम्भवः।

ज्ञानं प्रमाणमित्युक्ते संशयादावतिव्याप्तिः स्याद् अतः स्वपरव्यवसायीति पदम्, नैयायिकाभिमतस्य जडस्वरूपस्य सन्निकर्षादेः, स्वसमयप्रसिद्धस्य सन्मात्रविषयस्य दर्शनस्य च प्रामाण्यनिराकरणार्थं ज्ञानमिति पदम्, बौद्धैः परिकल्पितस्य निर्विकल्पस्य प्रामाण्यव्यवच्छेदार्थं व्यवसायीति पदम्, ज्ञानाद्वैतवादिनां मतमपाकर्तुं परेति, नित्यपरोक्षज्ञानवादिनां मीमांसकानाम्, एकात्मसमवायिज्ञानान्तरप्रत्यक्षवादिनां नैयायिकानाम्, अचेतनज्ञानवादिनां सांख्यानां च मतं निराकर्तुं स्वेति,

अयमर्थः—यथा घटो जडत्वात् स्वनिश्चये अर्थनिश्चये च साधकतमो न भवति, तथैव इन्द्रियविषयसम्बन्धरूपः सन्निकर्षोऽपि स्वनिश्चये अर्थनिश्चये च करणं न भवितुमर्हति, जडत्वादेव।

(प्रयोगश्च सन्निकर्षादिर्न प्रमाणं स्वार्थव्यवसितावसाधकतमत्वात्, यत् स्वार्थव्यवसितावसाधकतमं तन्न प्रमाणं यथा घटः स्वार्थव्यवसितावसाधकतमश्च सन्निकर्षादिस्तस्मान्न प्रमाणम्।)

नैयायिकाः प्रत्यक्षं प्रति सन्निकर्षस्य प्रामाण्यमङ्गीकुर्वन्ति, तथाहि—तेषां मते सन्निकर्षः षोढा—संयोगः, संयुक्तसमवायः, संयुक्तसमवेतसमवायः, समवायः, समवेतसमवायः, विशेषणविशेष्यभावश्चेति।

तत्र चक्षुषा घटग्रहणे संयोगः सन्निकर्षः। घटरूपग्रहणे संयुक्तसमवायः, चक्षुस्संयुक्तो घटः तत्र रूपस्य समवायात्। रूपत्वग्रहणे संयुक्तसमवेतसमवायः, चक्षुस्संयुक्तो घटः तत्र समवेतं रूपं तत्र रूपत्वस्य समवायात्। श्रोत्रेन्द्रियेण शब्दग्रहणे समवायस्सन्निकर्षः, श्रोत्रेन्द्रियस्य गगनरूपत्वात् "कर्णशष्कुल्यवच्छिन्नं नभः श्रोत्रम्" इतिवचनात्,

यथा स्तम्भः अचेतनश्च सन्निकर्षादिः, तस्मात्स्वनिश्चितौ करणं न भवति।

तथा सन्निकर्षादिरर्थनिश्चितौ करणं न भवति, स्वानिश्चितावकरणत्वात्, य एवं स एवं यथा स्तम्भादिरिति ॥ॐ॥६॥

तद् व्यवसायस्वभावं समारोपपरिपंथित्वात्-प्रमाणत्वाद्वा ॥ १-७ ॥

तत्-प्रमाणभूतं ज्ञानं व्यवसायस्वभावम्-निश्चयात्मकम्, समारोपपरिपंथित्वात्-संशयादिविरुद्धत्वात्, प्रमाणत्वाद्वा, प्रमाणभूतस्य ज्ञानस्य व्यवसायात्मकत्वसाधने प्रत्येकमेवामू हेतू. तथाहि-प्रमाणभूतं ज्ञानं व्यवसायस्वभावं समारोपपरिपन्थित्वात्. एवं प्रमाणभूतं ज्ञानं व्यवसायस्वभावं प्रमाणत्वात् यन्न व्यवसायस्वभावं तन्न समारोपपरिपन्थि प्रमाणं वा. यथा संशयादिर्घटादिश्च समारोपपरिपन्थि प्रमाणं चेदं ज्ञानं तस्माद् व्यवसायस्वभावमिति।

इदमत्रावधेयं-सुगतमते हि सर्व वस्तुजातं क्षणिकम्, क्षणिकस्य वस्तुनो यत्प्रथमाक्षसन्निपातानन्तरं ज्ञानमुत्पद्यते तन्नामजात्यादिकल्पनारहितत्वान्निर्विकल्पकमुच्यते, तदनन्तरं वासनाबलसमुज्जृम्भमाणविकल्पविज्ञानं संकेत-

तद्भाववति तत्प्रकारकं ज्ञानं समारोपः, अयथार्थ-ज्ञानमितियावत् ॥ ८ ॥

स विपर्ययसंशयानध्यवसायभेदात् त्रेधा ॥१-९॥

विपरीतैककोटिनिष्टङ्कनं विपर्ययः ॥ १-१० ॥

येनाकारेण वस्तुस्थितं तद्विपरीतैकाकारेण तस्य निश्चयनं विपर्ययः ॥ ९-१० ॥

यथा शुक्तिकायामिदं रजतम् ॥ १-११ ॥

शुक्तिकायामरजताकारायां रजताकारेण यज्ज्ञानं स विपर्ययः—विपरीतख्यातिरित्यर्थः ।

(ख्यातयो बहुविधाः, यथा—आत्मख्यातिः, असत्ख्यातिः, अख्यातिः, अनिर्वचनख्यातिः, सत्ख्यातिः, अन्यथाख्यातिश्चेति । तत्र-आत्मख्यातिः-आत्मनः ज्ञानस्यैव ख्यातिः-विषयरूपतया भानम्, अयमर्थः—'शुक्तौ इदं रजतम्, इत्यत्र ज्ञानस्यैव रजतरूपतया भानं भवति, न च तत्र कश्चिद् बाह्योऽर्थो विद्यते, 'अयं घट' इत्यादिषु सर्वत्र ज्ञानस्यैव विषयरूपतया प्रतिभासमानत्वात् । इति योगाचारापरपर्यायविज्ञानवादिनो बौद्धाः ।)

सत्ख्यातिर्नाम सतो–विद्यमानविषयस्य ख्यातिः–प्रतीतिः, तथाहि. शुक्ताविदं रजतम् इत्यत्र शुक्तौ विद्यमानस्यैव रजतांशस्य प्रतीतिः "तदेव सदृशं तस्य यत्तद् द्रव्यैकदेश-भाक्" इति नियमात् पञ्चीकरणप्रक्रियया च तत्र रजतांशानां विद्यमानत्वात्। अदृष्टवशात्तु भूयसामपि शुक्त्यंशानां न प्रतीतिः, स्वल्पानामपि रजतांशानां प्रतीतिर्भवति, अतः 'शुक्तौ इदं रजतम्, इति ज्ञानं यथार्थमेव, तत्र ज्ञानविषयस्य विद्यमानत्वात्, विषयव्यवहारबाधात्तु भ्रमत्वेन व्यवहार इति विशिष्टाद्वैतवेदान्तिनः।

अन्यथाख्यातिः—अन्यथा स्थितस्य वस्तुनोऽन्यरूपेण प्रतीतिः, तथाहि–अन्यथा स्थितस्य शुक्त्यादिरूपस्यार्थ-स्यान्यथा-रजतादिरूपेण प्रतिभासनमन्यथा-(विपरीत-) ख्यातिरिति जैनाः नैयायिकाश्च।

एतासां खण्डनमण्डनप्रकारस्तु जिज्ञासुभिः स्याद्वाद-रत्नाकरादवसेयः, ग्रन्थविस्तरभिया नात्र प्रपञ्च्यते॥११॥

साधकबाधकप्रमाणाभावादनवस्थितानेकको-टिसंस्पर्शि ज्ञानं संशयः ॥ १-१२ ॥

साधकप्रमाणाभावात् बाधकप्रमाणाभावाच्चानिश्चितानेकांशावगाहि ज्ञानं संशय इत्यर्थः ॥ १२ ॥

यथाऽयं स्थाणुर्वा पुरुषो वा ॥ १-१३ ॥

प्रत्यक्षविषये धर्मिणि दूरादूर्ध्वतादिसाधारणधर्मदर्शनेन वक्रकोटरादिकरचरणादिविशेषधर्मस्मरणे सति एकतरनिश्चायकसाधकबाधकप्रमाणाभावाद् दोलायमानं 'स्थाणुर्वा पुरुषो वा,? इत्याकारकं यज्ज्ञानं प्रादुर्भवति स संशयः, अयं प्रत्यक्षविषयः। अनुमानविषयस्तु कचिद्वनप्रदेशे शृङ्गमात्रावलोकनेन भवति संशयः, 'अयं गौर्वा स्याद्गवयो वा' ?, इति ॥ १३ ॥

किमित्यालोचनमात्रमनध्यवसायः ॥ १-१४ ॥

यत्र विशेषस्य स्पष्टतया भानं न भवति, अपि तु किमित्यालोचनात्मकं ज्ञानं भवति सोऽनध्यवसाय इत्युच्यते ॥ १४ ॥

यथा गच्छत्तृणस्पर्शज्ञानम् ॥ १-१५ ॥

यथा गच्छतः पुरुषस्यान्यत्राऽऽसक्तचित्तस्य तृणस्पर्शे जाते एवं जातीयकं एवं नामकमित्यादि विशेषरूपेणावधारणं न भवति, अपि तु 'मया किमपि स्पृष्टम्, इत्याकारकमा[illegible]

मन्तरा घटाद्याकारविशिष्टं ज्ञानमुपपद्यते इति बाह्यार्थोऽङ्गीकर्तव्य एवेति संक्षेपः। एते च बौद्धा वैभाषिक-सौत्रान्तिक-योगाचार-माध्यमिकभेदाच्चतुर्विधाः।

तत्र वैभाषिको बाह्यं घटपटादि, आन्तरं च वस्तुतत्त्वं सत्यत्वेनाङ्गीकरोति। सौत्रान्तिको यद्यपि बाह्यमान्तरंचेति द्विविधमपि तत्त्वं स्वीकरोति, तथापि बाह्यपदार्थानां प्रत्यक्षं नैव मन्यते, घटपटादिनानाकारं ज्ञानं वर्तते, ततोऽनुमीयते बाह्यपदार्थाः सन्तीति इति बाह्यपदार्थावगतिं ब्रूते। योगाचारस्तु बाह्यपदार्थानां सर्वथैवाऽपलापं करोति, केवलमान्तरमेव ज्ञानाख्यं तत्त्वं स्वीकरोति, ज्ञानमेव ग्राह्यग्राहकरूपेण प्रतिभासते, न वस्तुतो बाह्यपदार्थाः सन्तीति सिद्धान्तयति। माध्यमिकस्तु सर्वशून्यत्वमेव वदति, तथाहि-मानाधीना मेयसिद्धिरिति नियमेन पदार्थानां सिद्धिर्यदि प्रमाणाधीना, तर्हि प्रमाणस्य सिद्धिः केन? अन्येन प्रमाणेन चेत्, तस्य कथं? अन्येन चेत्, तर्हि तस्याप्यन्येन, इत्यादिरूपेणानवस्था। यदि तेनैव प्रमाणेन, तर्हि आत्माश्रयः, अतः प्रमाणं न सिध्यति, प्रमाणसिद्ध्यभावात्प्रमेयमपि न सिध्यतीति सिद्धा सर्वशून्यता ॥ १६ ॥

तथा च संग्रहश्लोकः श्रीहरिभद्रसूरीयषड्दर्शन-समुच्चयस्य श्रीगुणरत्नसूरिकृतायां टीकायाम्—

अर्थो ज्ञानसमन्वितो मतिमता वैभाषिकेणोच्यते
प्रत्यक्षो नहि बाह्यवस्तुविसरः सौत्रान्तिकैराश्रितः।
योगाचारमतानुगैरभिमता साकारबुद्धिःपरा
मन्यन्ते बत मध्यमाः कृतधियः स्वस्थां परां संविदम्॥

एषां खण्डनप्रकारस्तु ग्रन्थान्तरादवसेयः ॥ १६ ॥

स्वस्य व्यवसायः स्वाभिमुख्येन प्रकाशनं, बाह्यस्येव तदाभिमुख्येन, करिकलभकमहमात्मना जानामि ॥ १-१७ ॥

यथा ज्ञानस्य बाह्याभिमुख्येन-विषयानुभवनेन, प्रकाशनं बाह्यव्यवसायः. एवं स्वाभिमुख्येन-स्वानुभवनेन प्रकाशनं, स्वव्यवसायः, तथाहि—यथा 'करिकलभकमहमात्मना जानामि' इत्यत्र 'अहम्' इत्यनेन प्रमाता, 'करिकलभकम्' इत्यनेन प्रमेयं, 'जानामि' इत्यनेन प्रमितिः प्रतीयते, तथैव 'आत्मना' इत्यनेन प्रमाणभूतं ज्ञानमपि प्रतीयत एव ॥ १७ ॥

कः खलु ज्ञानस्याऽऽलम्बनं बाह्यं प्रतिभात-

तदितरत्त्वप्रामाण्यम् ॥ १–२० ॥

तस्मात्—प्रमेयाऽव्यभिचारित्वात्, इतरत्—प्रमेयव्यभिचारित्वम् अप्रामाण्यम् । यादृशोऽर्थो ज्ञानविषयतामागतस्तादृश एव चेन्न प्राप्यते तदा तज्ज्ञानमप्रमाणं, यथा-'शुक्तिकायामिदं रजतम्' इति ज्ञानम् ॥ २० ॥

तदुभयमुत्पत्तौ परत एव ज्ञप्तौ तु स्वतः परतश्च ॥ १–२१ ॥

ज्ञानगतप्रामाण्याप्रामाण्यविषये मिथो विवदन्ते दर्शनकाराः, तथाहि—उत्पत्तौ ज्ञप्तौ च ज्ञानानां प्रामाण्यं स्वतः, अप्रामाण्यं परत इति मीमांसका वेदान्तिनश्च । उभयत्रापि प्रामाण्याप्रामाण्यं परत इति नैयायिकाः । अप्रामाण्यं स्वतः प्रामाण्यं परत इति सौगताः । तत्त्वविदस्तु "तदुभयमुत्पत्तौ परत एव ज्ञप्तौ तु स्वतः परतश्च" इति वदन्ति ।

तदुभयम्—प्रामाण्यमप्रामाण्यं च, उत्पत्तौ—स्वोत्पत्तौ परत एव—ज्ञानकारणगतगुणदोषाभ्यामेव उत्पद्यते इति शेषः, ज्ञप्तौ तु-निश्चये तु स्वतः परतश्च, अभ्यासदशाऽऽपन्ने करतलादिज्ञाने स्वतः, अनभ्यासदशाऽऽपन्ने सर्पादिज्ञाने परतः-संवाद-बाधकाभ्यां निश्चीयते ।

संव्यवहारः—बाधारहितप्रवृत्तिनिवृत्ती ...
सांव्यवहारिकं, परमार्थे भवं पारमार्थिकम् ।

अयं भावः—बाह्येन्द्रियादिसाधनेभ्यो ...
तत्सांव्यवहारिकप्रत्यक्षमुच्यते, इदम् अपारमार्थिकं, ...
न्द्रियादिसामग्रीसापेक्षत्वात् । अवधि-मनःपर्याय ...
रूपं तु पारमार्थिकं प्रत्यक्षम्, बाह्येन्द्रियादिसामग्री ...
तद्धि आत्मसन्निधिमात्रेणोत्पद्यते ॥ ४ ॥

तत्राऽऽद्यं द्विविधम्-इन्द्रियनिबन्धनमनि-यनिबन्धनं च ॥ २—५ ॥

तत्र-उभयोर्मध्ये, आद्यं-सांव्यवहारिकं प्रत्यक्षं, द्विवि...
द्विप्रकारं, इन्द्रियनिबन्धनं- चक्षुरादीन्द्रियहेतुकम्, अनि...
यनिबन्धनं च-मनोहेतुकं चेत्यर्थः । चक्षुरादीन्द्रियजन्यं ...
जन्यं च यज्ज्ञानं तत् सांव्यवहारिकप्रत्यक्षमुच्यते ...
समुदायार्थः ।

इन्द्रियं द्विविधं, द्रव्येन्द्रियभावेन्द्रियभेदात्, ...
द्विविधं, निर्वृत्तीन्द्रियोपकरणेन्द्रियभेदात्, निर्वृत्ति...
द्विविधं, बाह्याभ्यन्तरभेदात्, तत्र बाह्यं-प्रत्यक्षेण परि०

कर्णशष्कुल्याद्यनेकप्रकारम्, आन्तरं–कदम्बपुष्पाद्याकारम्। उपकरणेन्द्रियं–आभ्यन्तरनिर्वृत्तीन्द्रियस्थितं स्वस्वविषयग्रहणशक्तिरूपं, यस्मिन् उपहते निर्वृत्तीन्द्रियसत्त्वेऽपि विषयग्रहणं न भवति तत्।

भावेन्द्रियमपि द्विविधम्, लब्ध्युपयोगभेदात्, तत्र लब्धीन्द्रियं–इन्द्रियावरणक्षयोपशमापरपर्यायार्थग्रहणशक्तिरूपम्। अर्थग्रहणव्यापाररूपमुपयोगेन्द्रियम्। चक्षुषोऽप्राप्यप्रकाशकारित्वम्, अन्येषामिन्द्रियाणां तु प्राप्यप्रकाशकारित्वमिति।

नैयायिकादयस्तु सर्वेषामिन्द्रियाणां प्राप्यप्रकाशकारित्वमेव वदन्ति। बौद्धास्तु चक्षुःश्रोत्रेन्द्रियवर्ज्यानीन्द्रियाणि प्राप्यप्रकाशकारिणीति मन्यन्ते।

मनोऽपि द्रव्यभावभेदाद् द्विविधम् अप्राप्यप्रकाशकारि चास्तीति ॥ ५ ॥

एतद् द्वितयमवग्रहेहावाय-धारणाभेदादेकशश्चतुर्विकल्पकम् ॥ २–६ ॥

एतद् द्वितयम्–इन्द्रियनिबन्धनमनिन्द्रियनिबन्धनं च,

प्रकाराः—प्रत्येकम् अवग्रह-ईहा—अवाय-धारणाभेदात् चतुष्प्रकारम्—चतुर्भेदम् ॥ ६ ॥

विषयविषयिसन्निपातानन्तरसमुद्भूतसत्तामात्रगोचरदर्शनाज्जातमाद्यमवान्तरसामान्याऽऽकारविशिष्टवस्तुग्रहणमवग्रहः ॥ २-७॥

विषयः—सामान्यविशेषात्मकोऽर्थः, विषयी—चक्षुरादीन्द्रियानिन्द्रियसमुदायः, तयोः सन्निपातः—योग्यदेशा[illegible]स्थानम्, तदनन्तरमुत्पन्नं यत्सत्तामात्रविषयकं दर्शनम्—निराकारं ज्ञानम्, तस्मादनन्तरमुत्पन्नं यत् [illegible] मनुष्यत्वादिसामान्याऽऽकारविशिष्टवस्तुग्रहणम् अवग्रहः [illegible] इत्यर्थः ॥ ७ ॥

अवगृहीतार्थविशेषाऽऽकाङ्क्षणमीहा ॥ २-८॥

अवगृहीतार्थेन—मनुष्यत्वादिसामान्यरूपेण गृहीतस्या[illegible]—'अनेन कार्णाटकेन भवितव्यम्' [illegible] ॥ ८ ॥

ईहितविशेषनिर्णयोऽवायः ॥ २-९ ॥

ईहितविशेषस्य-ईहाविषयीकृतस्य वस्तुनो निर्णयः अयं कान्यकुब्ज एव, इत्याकारको निर्णयः-अवायः ॥ ९ ॥

स एव दृढतमावस्थापन्नो धारणा ॥ २-१० ॥

स एव-अवाय एव, दृढतमावस्थापन्नः-सादरस्य प्रमातुः किञ्चित्कालं तिष्ठन् धारणेत्यभिधीयते ।

इदमत्र सूत्रचतुष्टयस्य तात्पर्यम्-इन्द्रियविषयसन्निपातानन्तरं प्रथमम् 'अस्ति किञ्चिद्' इत्याकारं निराकारं ज्ञानमुत्पद्यते, तद् दर्शनमित्यभिधीयते, तादृशदर्शनानन्तरं मनुष्यत्वाद्यवान्तरसामान्याकारविशिष्टम्-'अयं मनुष्यः' इत्याकारकं यज्ज्ञानमुत्पद्यते सोऽवग्रह इत्युच्यते, तदनन्तरम् 'अनेन कान्यकुब्जेन भवितव्यम्' इत्याद्याकारं विशेषाऽऽकाङ्क्षणमीहाज्ञानं भवति, ततः 'अयं कान्यकुब्ज एव' इत्याकारकं निश्चयात्मकं ज्ञानमुन्मज्जति सोऽवायः, स एवावायः सादरस्य प्रमातुः किञ्चित्कालं तिष्ठन् धारणेत्यभिधीयते ॥ १० ॥

संशयपूर्वकत्वादीहायाः संशयाद्भेदः ॥ २-११ ॥

ईहायाः-'अनेन कान्यकुब्जेन भवितव्यम्' इत्याकारकस्य ज्ञानस्य, संशयपूर्वकत्वात्-'किमयं कान्यकुब्ज उत पाञ्चालः?'

इत्याकारकसंशयपूर्वकत्वात्, संशयाद्भेदः-ईहा
त्यर्थः । संशयस्याप्रमाणत्वादवग्रहादिषु पाठो न कृतः॥११

कथञ्चिदभेदेऽपि परिणामविशेषादेषां
पदेशभेदः ॥ २-१२ ॥

एषां-दर्शनावग्रहादीनां. कथञ्चिद्
अभेदेऽपि-एकत्वेऽपि. परिणामविशेषात्-पर्यायनयापे
व्यपदेशभेदः-भिन्नत्वेन प्रतिपादनमित्यर्थः ।

एकजीवद्रव्ये दर्शनादीनां कथञ्चिदविष्वग्भावेन
मानत्वादेकत्वेऽपि परिणामापेक्षया कथञ्चित्
प्रतिपादनमिति भावः ॥ १२ ॥

असामस्त्येनाप्युत्पद्यमानत्वेन असंकीर्ण
भावतयाऽनुभूयमानत्वाद्, अपूर्वापूर्ववस्तु
पर्यायप्रकाशकत्वात्, क्रमभावित्वात् चैते
व्यतिरिच्यन्ते ॥ २-१३ ॥

एते-दर्शनावग्रहादयो व्यतिरिच्यन्ते-परस्परं
वर्त्तन्ते । कस्माद् ?

भेदाभिन्नस्वरूपेण ह्यदमानत्वाद् । सामस्त्येनोत्पत्तिरप्येते
षामसंकीर्णस्वभावतयाऽनुभूयमानताऽस्ति. अत उक्तम्-
असामस्त्येनाप्युत्पद्यमानत्वात् इति कदाचिद्दर्शनमेव, कदा-
चिद्दर्शनावग्रहौ, कदाचिद्दर्शनावग्रहसंशयेहा इत्यादि रूपेणा-
पूर्णतयाऽप्युत्पद्यमानत्वात् । असामस्त्येनाप्युत्पद्यमानत्वम-
संकीर्णस्वभावतयानुभूयमानत्वे हेतुः. असंकीर्णस्वभावतया-
नुभूयमानत्वं च दर्शनावग्रहादीनां परस्परभिन्नत्वे हेतुः,
प्रथमेको हेतुः, अपूर्वापूर्ववस्तुप्रकाशकत्वात्-वस्तुनो भिन्न-
भिन्नधर्मस्य प्रकाशकत्वात्, अयं द्वितीयो हेतुः । क्रमभावि-
त्वाच्च-क्रमेणोत्पद्यमानत्वाच्च, अयं तृतीयो हेतुः । तथा च येऽ-
संकीर्णस्वभावतयानुभूयन्ते, अपूर्वापूर्ववस्तुपर्यायप्रकाशकाः,
क्रमभाविनो वा ते परस्परं व्यतिरिक्ताः, यथा स्तम्भादयः,
अनुमानादयः. अङ्कुरकन्दलकाण्डादयो वा, तथा चैते
दर्शनावग्रहादयः, तस्मात् परस्परं भिन्ना इति ॥ १३ ॥

क्रमोऽप्यमीषामयमेव तथैव संवेदनात्, एवं क्रमाविर्भूतनिजकर्मक्षयोपशमजन्यत्वाच्च ॥ २–१४ ॥

अमीषां-दर्शनावग्रहादीनां, क्रमोऽप्ययमेव-आदौ दर्शनं,
तदनन्तरमवग्रहः, ततः संशयः. पश्चादीहा, ततोऽवायः,

इत्याकारकसंशयपूर्वकत्वात्, संशयाद्भेदः-ईहा
त्यर्थः । संशयस्याप्रमाणत्वादवग्रहादिषु पाठो न कृतः॥११॥

कथञ्चिदभेदेऽपि परिणामविशेषादेषां व्यपदेशभेदः ॥ २-१२ ॥

एषां-दर्शनावग्रहादीनां, कथञ्चित्
अभेदेऽपि-एकत्वेऽपि, परिणामविशेषात्-पर्यायनयापेक्षया
व्यपदेशभेदः-भिन्नत्वेन प्रतिपादनमित्यर्थः ।

एकजीवद्रव्ये दर्शनादीनां कथञ्चिदविष्वग्भावेन
मानत्वादेकत्वेऽपि परिणामापेक्षया कथञ्चित्
प्रतिपादनमिति भावः ॥ १२ ॥

असामस्त्येनाप्युत्पद्यमानत्वेन असंकीर्णस्वभावतयाऽनुभूयमानत्वाद्, अपूर्वापूर्ववस्तुपर्यायप्रकाशकत्वात्, क्रमभावित्वात् व्यतिरिच्यन्ते ॥ २-१३ ॥

एते-दर्शनावग्रहादयो व्यतिरिच्यन्ते-परस्परं
वर्त्तन्ते । कस्माद् ?

भेक्षमिन्नस्वरूपेण ज्ञायमानत्वात् । सामस्त्येनोत्पत्तिस्तते
पामसंकीर्णस्वभावतयाऽनुभूयमानताऽस्ति. अत उक्तम्-
असामस्त्येनाप्युत्पद्यमानत्वात्' इति कदाचिद्दर्शनमेव, कदा-
चेद्दर्शनावग्रहौ, कदाचिद्दर्शनावग्रहसंशयेहा इत्यादि रूपेणा-
पूर्णतयाऽप्युत्पद्यमानत्वात् । असामस्त्येनाप्युत्पद्यमानत्वम-
संकीर्णस्वभावतयानुभूयमानत्वे हेतुः. असंकीर्णस्वभावतया-
नुभूयमानत्वं च दर्शनावग्रहादीनां परस्परभिन्नत्वे हेतुः,
अयमेको हेतुः, अपूर्वापूर्ववस्तुप्रकाशकत्वात्-वस्तुनो भिन्न-
भिन्नधर्मस्य प्रकाशकत्वात्, अयं द्वितीयो हेतुः । क्रमभावि-
त्वाच्च-क्रमेणोत्पद्यमानत्वाच्च, अयं तृतीयो हेतुः । तथा च येऽ-
संकीर्णस्वभावतयानुभूयन्ते, अपूर्वापूर्ववस्तुपर्यायप्रकाशकाः,
क्रमभाविनो वा ते परस्परं व्यतिरिक्ताः, यथा स्तम्भादयः,
अनुमानादयः, अङ्कुरकन्दलकाण्डादयो वा, तथा चैते
दर्शनावग्रहादयः, तस्मात् परस्परं भिन्ना इति ॥ १३ ॥

क्रमोऽप्यमीषामयमेव तथैव संवेदनात्, एवं क्रमाविर्भूतनिजकर्मक्षयोपशमजन्यत्वाच्च ॥ २–१४ ॥

अमीषां-दर्शनावग्रहादीनां, क्रमोऽप्ययमेव-आदौ दर्शनं,
तदनन्तरमवग्रहः, ततः संशयः, पश्चादीहा, ततोऽवायः,

[illegible]कारसंस्पर्शित्वात्, [illegible]
[illegible]र्थः । [illegible]ग्रहादिषु [illegible] न [illegible]

कथञ्चिदभेदेऽपि परिणामविशेषादेषा
पदेशभेदः ॥ २-१२ ॥

एषां-दर्शनावग्रहादीनां. कथञ्चित्-द्रव्यनयापे
अभेदेऽपि-एकत्वेऽपि. परिणामविशेषात्-पर्यायनयापे
व्यपदेशभेदः-भिन्नत्वेन प्रतिपादनमित्यर्थः ।

एकजीवद्रव्ये दर्शनादीनां कथञ्चिदविष्वग्भावेन
मानत्वादेकत्वेऽपि परिणामापेक्षया कथञ्चित्
प्रतिपादनमिति भावः ॥ १२ ॥

असामस्त्येनाप्युत्पद्यमानत्वेन असंकी
भावतयाऽनुभूयमानत्वाद्, अ
पर्यायप्रकाशकत्वात्, क्रमभावित्वात्
व्यतिरिच्यन्ते ॥ २-१३ ॥

एते-दर्शनावग्रहादयो व्यतिरिच्यन्ते-परस्परं
वर्त्तन्ते। कस्माद् ? असंकीर्णस्वभावतयाऽनुभू

अयमर्थः—यथा सूच्यादिना क्रियमाणस्योत्पलशतपत्रस्य भेदक्रमः शीघ्रोत्पन्नत्वान्न ज्ञायते, तथा क्वचिद्
रतलादौ दर्शनादीनामपि क्रमो नानुभूयते ॥ १७ ॥

पारमार्थिकं पुनरुत्पत्तावात्ममात्रापेक्षम् ॥२–१८॥

आत्ममात्रापेक्षम्-जीवद्रव्यमेवापेक्षते। अयं भावः–सांव्यवहारिकप्रत्यक्षमिन्द्रियादिसापेक्षमात्मद्रव्यमवलम्ब्योत्पद्यते, पारमार्थिकं तु प्रत्यक्षमिन्द्रियादिनिरपेक्षमात्मद्रव्यमवलम्ब्योत्पद्यते, इति ॥ २–१८ ॥

तद् विकलं सकलं च ॥ २–१९ ॥

तत्-पारमार्थिकं प्रत्यक्षम्, विकलम्–असमग्रविषयकम्, सकलम्-समग्रविषयकमिति द्विभेदमित्यर्थः ॥ १९ ॥

तत्र विकलमवधिमनःपर्यायज्ञानरूपतया द्वेधा ॥ २–२० ॥

तत्र-विकलसकलयोर्मध्ये, विकलं-विकलाख्यं प्रत्यक्षम्, अवधिमनःपर्यायभेदेन द्विविधमित्यर्थः ॥ २० ॥

अवधिज्ञानावरणविलयविशेषसमुद्भवं भवगुणप्रत्ययं रूपिद्रव्यगोचरमवधिज्ञानम् ॥२-२१॥

[illegible] इति भावः ॥ १४ ॥

अन्यथा प्रमेयानवगतिप्रसङ्गः ॥ २-१५

अन्यथा-यथोक्तक्रमानङ्गीकारे, प्रमेयानवगतिप्र[illegible]
वस्तुनोऽनवभासप्रसङ्गः स्यात् ॥ १५ ॥

न खल्वदृष्टमवगृह्यते, न चानवगृहीतं सं[illegible]
यते, न चासंदिग्धमीह्यते, न चानीहितमवेय[illegible]
नाप्यनवेतं धार्यते ॥ २-१६ ॥

अदृष्टे वस्तुनि अवग्रहो न भवति, अनवगृहीते स[illegible]
न भवति, असन्दिग्धे ईहा न भवति, अनीहिते अवाया[illegible]
भवति, अवायाऽविषयीकृते वस्तुनि धारणा न भवति ॥१[illegible]

क्वचित् क्रमस्यानुपलक्षणमेषाम् आशूत्पादा[illegible]
उत्पलपत्रशतव्यतिभेदक्रमवत् ॥ २-१७ ॥

अयमर्थः—यथा सूच्यादिना क्रियमाणस्योत्पलशत-
स्य भेदक्रमः शीघ्रोत्पन्नत्वान्न ज्ञायते, तथा क्वचिद्
तलादौ दर्शनादीनामपि क्रमो नानुभूयते ॥ १७ ॥

रमार्थिकं पुनरुत्पत्तावात्ममात्रापेक्षम्॥२—१८॥

आत्ममात्रापेक्षम्-जीवद्रव्यमेवापेक्षते। अयं भावः–सां-
व्यवहारिकप्रत्यक्षमिन्द्रियादिसापेक्षमात्मद्रव्यमवलम्ब्योत्पद्य-
, पारमार्थिकं तु प्रत्यक्षमिन्द्रियादिनिरपेक्षमात्मद्रव्यमवल-
म्ब्योत्पद्यते, इति ॥ २–१८ ॥

द् विकलं सकलं च ॥ २—१९ ॥

तद्-पारमार्थिकं प्रत्यक्षम्, विकलम्—असमग्रविषयकम्,
कलम्-समग्रविषयकमिति द्विभेदमित्यर्थः ॥ १९ ॥

त्र विकलमवधिमनःपर्यायज्ञानरूपतया द्वेधा ॥ २—२० ॥

तत्र-विकलसकलयोर्मध्ये, विकलं-विकलाख्यं प्रत्यक्षम्,
रवधिमनःपर्यायभेदेन द्विविधमित्यर्थः ॥ २० ॥

**अवधिज्ञानावरणविलयविशेषसमुद्भवं भव-
गुणप्रत्ययं रूपिद्रव्यगोचरमवधिज्ञानम्॥२-२१॥**

अवधिज्ञानस्य यदावरणं तस्य विलयविशेषात्-व मनाक्क्षाद्विनाशाद्, उत्पन्नं भवगुणप्रत्ययं-भवः-सुरन जन्मलक्षणः,गुणः-क्षयोपशमसम्यग्दर्शनादिः,तौ प्रत्ययौ रणे यस्य तद् भवगुणप्रत्ययं-भवकारणकं, गुणकारणकं तत्र सुरनारकाणामवधिज्ञानं सुरनारकजन्मग्रहणमात्रेणैवो त्पत इति भवप्रत्ययमित्युच्यते; नरतिरश्चां तु सम्यग्दर्शनादि गुणैस्तत्प्रादुर्भवतीति गुणप्रत्ययमित्यभिधीयते, रूपिद्रव्य गोचरम्-पृथिव्यप्तेजोवाय्वन्धकारच्छायाप्रभृतीनि रूपिद्रव्या णि, तद्विषयकम् ॥ २१ ॥

संयमविशुद्धिनिबन्धनाद्विशिष्टाऽऽवरणविच्छे दाज्जातं मनोद्रव्यपर्यायालम्बनं मनःपर्याय ज्ञानम् ॥ २-२२ ॥

संयमस्य-चारित्रस्य, विशुद्धिः-निर्मलता, निबन्धनं कारणं यस्य स संयमविशुद्धिनिबन्धनो यो विशिष्टावरणवि च्छेदः-मनःपर्यायज्ञानावरणक्षयोपशम इति यावत्। त जातं-उत्पन्नं, मनोद्रव्यपर्यायालम्बनम्-मनोद्रव्यपर्या यविषयकम् मनःपर्यायज्ञानम्। चारित्रविशुद्ध्या मनःपर्या

नाऽऽवरणस्य क्षयोपशमो भवति, तेन च मनोद्रव्यपर्याय-
पयकं ज्ञानमुत्पद्यते, तन्मनःपर्यायज्ञानमुच्यते ॥ २२ ॥

सकलं तु सामग्रीविशेषतः समुद्भूतसमस्ता-
रणक्षयापेक्षं निखिलद्रव्यपर्यायसाक्षात्कारि-
स्वरूपं केवलज्ञानम् ॥ २–२३ ॥

सकलं तु-सकलाख्यं पारमार्थिकं प्रत्यक्षं पुनः, सामग्री-
शेषसमुद्भूतसमस्तावरणक्षयापेक्षम्-सामग्री द्विविधा, बहि-
गा अन्तरङ्गा च, तत्रान्तरङ्गा सामग्री प्रकर्षप्राप्तक्षपक-
णिसम्यग्दर्शनादिस्वरूपा, बहिरङ्गा पुनर्जिनकालिकमनु-
भवादिरूपा, तेन सामग्रीविशेषेण समुद्भूतः-समुत्पन्नो
ः समस्ताऽऽवरणक्षयःतदपेक्षं-तत्कारणकं निखिलद्रव्य-
र्यायाणां यः साक्षात्कारस्तत्स्वरूपं केवलज्ञानं ज्ञातव्यम् ॥२३॥

तद्वान् अर्हन् निर्दोषत्वात् ॥ २–२४ ॥

तद्वान्-केवलज्ञानवान् । तथा च प्रयोगः-अर्हन् सर्वज्ञः,
निर्दोषत्वात्, यो न सर्वज्ञः स न निर्दोषः, यथा रथ्यापुरुषः,
निर्दोषश्चार्हन् तस्मात्सर्वज्ञः ॥ २४ ॥

निर्दोषोऽसौ प्रमाणाऽविरोधिवाक्त्वात् ॥२-२५॥

अर्हं

अथ तृतीयः परिच्छेदः

अस्पष्टं परोक्षम् ॥ ३-१ ॥

वैशद्याभावविशिष्टं यत्प्रमाणं तत् परोक्षप्रमाणम्। ॥ १ ॥

स्मरणप्रत्यभिज्ञानतर्कानुमानागमभेदतस्तत्पञ्चप्रकारम् ॥ ३-२ ॥

तत्—परोक्षप्रमाणम्, अन्यत्स्पष्टम् ॥ २ ॥

तत्र संस्कारप्रबोधसंभूतमनुभूतार्थ। तदित्याकारं वेदनं स्मरणम् ॥ ३-३ ॥

अनुभवजन्यो यः संस्कारः—आत्मशक्तिविशेषः तत्प्रबोधसम्भूतम्—उत्पन्नम्, इति कारणनिरूपणम्, इदंप्रमाणैरनुभूतोऽर्थः—विषयो यस्य तदनुभूतार्थविषयम्, विषयप्रदर्शनम्, तदित्याकारं—तच्छब्देनोल्लेखनीयम्, स्वरूपप्रतिपादनम्, वेदनं—ज्ञानं स्मरणमित्युच्यते।

स्मरणं प्रत्युद्बुद्धसंस्कारः कारणम् । अनुभूतार्थस्तस्य विषयः । तच्छब्देनोल्लेखस्तस्य स्वरूपमिति ॥ ३ ॥

तत् तीर्थकरविम्बमिति यथा ॥ ३-४ ॥

तदित्यनेन यत् प्राक् प्रत्यक्षीकृतं स्मृतं प्रत्यभिज्ञातं वितर्कितमनुमितं श्रुत वा भगवतस्तीर्थकरस्य विम्बं-प्रतिकृतिः तस्य परामर्शः ॥ ४ ॥

अनुभवस्मृतिहेतुकं तिर्यगूर्ध्वतासामान्यादि-गोचरं संकलनात्मकं ज्ञानं प्रत्यभिज्ञानम् ॥३-५॥

अनुभवस्मृतिहेतुकं-प्रत्यक्षादिप्रमाणजन्यं ज्ञानमनुभवः, स्मृतिश्चानन्तरोक्ता. ते हेतुर्यस्य तद्, इति कारणनिरूपणम्, गवादिषु सदृशपरिणामस्वरूपं गोत्वादिकं तिर्यक्सामान्य-मित्युच्यते । कटककुण्डलादिपर्यायेषु यदन्वयिद्रव्यं सुवर्णादि तदूर्ध्वतासामान्यमित्युच्यते । एतदुभयमादिर्यस्य विसदृश-परिणामादेः, तिर्यगूर्ध्वतासामान्यादिर्गोचरो-विषयो यस्य तद् तिर्यगूर्ध्वतासामान्यादिगोचरम्, इति विषयनिरूपणम्, संकलनात्मकं-पदार्थस्य विवक्षितधर्मयुक्तत्वेन प्रत्यवमर्शन-मात्मा स्वभावो यस्य तद्, इति स्वरूपकथनम्, एतादृशं यज्ज्ञानं तत्प्रत्यभिज्ञानमुच्यते ।

प्रत्यभिज्ञानं प्रति अनुभवः स्मृतिश्च कारणम्। विवक्षितधर्मयुक्तत्वेन प्रत्यवमर्शनं तस्य स्व- भावः ॥ ५ ॥

यथा तज्जातीय एवायं गोपिण्डः, गवयः, स एवायं जिनदत्त इत्यादि ॥

'तज्जातीय एवायं गोपिण्डः' इति ति... दाहरणं, 'गोसदृशो गवयः' इति पुनरपि तिर्यक्-सा... स्योदाहरणप्रदर्शनं नैयायिकाद्यभि... निरासार्थं, सिद्धान्ते उपमानप्रमाणस्य प्रत्यभिज्ञाने... वात्, तथाहि—कश्चित्पुमान् वनेचरसकाशाद् यदा ... गवयः' इति वाक्यं शुश्रुवे, तदैव तस्य मनसि ... रूपेण प्रतिभासमाने गवयपिण्डे गवयशब्दस्य ... भूत्, पश्चाद् वनं गतस्यास्य गवयदर्शने जाते ... न्याकारसम्बन्धस्मरणे च 'स एष गवयपदवाच्यः' इति ... नाज्ञानरूपं प्रत्यभिज्ञानं प्रादुर्भवति, एवं 'गोसदृशो ... इत्याद्यपि तथारूपत्वात् प्रत्यभिज्ञानमेव। 'स ... जिनदत्तः' इत्यूर्ध्वतासामान्यस्योदाहरणम्, आदि ... 'स एव वह्निरनुमीयते मया' 'स एवार्थोऽने ...

इत्यादिस्मरणसहितानुमानाऽऽगमादिजन्यं ज्ञानं प्रत्यभिज्ञानं ज्ञातव्यम् ॥ ६ ॥

उपलम्भानुपलम्भसंभवं त्रिकालीकलितसाध्यसाधनसम्बन्धाद्यालम्बनम् 'इदमस्मिन् सत्येव भवति' इत्याद्याकारं संवेदनम् ऊहाऽपरनामा तर्कः ॥ ३-७ ॥

प्रमाणमात्रेण ग्रहणमुपलम्भः, प्रमाणमात्रेणाग्रहणमनुपलम्भः, ताभ्याम्–उपलम्भानुपलम्भाभ्यां, सम्भवः–उत्पत्तिर्यस्य तत् तथा, इति कारणकीर्त्तनम् । त्रिकालवर्त्तिसाध्यसाधनयोः सम्बन्धः–व्याप्तिः, स आदिर्यस्य निःशेषदेशकालवर्त्तिवाच्यवाचकभावसम्बन्धस्य, स आलम्बनं–विषयो यस्य तत् तथा, इति विषयनिरूपणम् । 'इदमस्मिन् सत्येव भवति इदमस्मिन्नसति न भवत्येव' इत्याकारं संवेदनं तर्कः, तस्यैव ऊहेति नामान्तरम् ।

अयं भावः–'वह्नौ सत्येव धूमो भवति वह्न्यभावे न भवति' इत्याकारकं ज्ञानं तर्क इत्युच्यते, । 'वह्निसत्त्वे एव धूमोपलम्भो वह्न्यभावे धूमस्यानुपलम्भः' इति उपलम्भा-

इत्याकारिकां व्याप्तिं स्मरति, ततः 'अयं वह्निमान्' इत्याकारकं यज्ज्ञानमुन्मज्जति तत्स्वार्थानुमानमित्युच्यते ॥ १० ॥

निश्चितान्यथानुपपत्त्येकलक्षणो हेतुः ॥३-११॥

अन्यथानुपपत्तिः—अविनाभावः, सा च साध्यवद्भिन्नाऽवृत्तित्वरूपा, हेत्वधिकरणवृत्त्यभावाऽप्रतियोगिसाध्यसामानाधिकरण्यरूपा वा । निश्चिताऽन्यथानुपपत्तिरेव लक्षणं-स्वरूपं यस्य स हेतुरित्यर्थः ॥ ११ ॥

न तु त्रिलक्षणकादिः ॥ ३-१२ ॥

त्रीणि लक्षणानि—पक्षसत्त्व-सपक्षसत्त्व-विपक्षाऽसत्त्वानि यस्य स त्रिलक्षणकः सौगतसम्मतः, आदिपदेनासत्प्रतिपक्षत्वमबाधितविषयत्वमितिद्वयं मीलित्वा नैयायिकाभिमतः पञ्चलक्षणकश्च हेतुर्न भवतीति भावः ॥ १२ ॥

तस्य हेत्वाभ [illegible] ।

[illegible] हेतुलक्षणस्य 'पर्वतो धूमवान्

[illegible] तस्य पक्षस[illegible] संभवादतिव्याप्तिः स्यात् ।

वह्[illegible]लाया साध्यश[illegible] वह्नेः' इत्यादिव्यभिचारिस्य-

भवं [illegible] व्याप्तेरनुपपत्ति

'समस्तवस्तुवेदी समस्ति' इत्यत्र समस्तवस्तुवेदी-सर्वज्ञो धर्मी, तस्य च विकल्पेन प्रसिद्धिः, नहि हेतुप्रयोगात् पूर्वं विकल्पं विहाय सर्वज्ञः केनापि प्रमाणेन सिध्यति। 'क्षितिधर-कन्धरेयं धूमध्वजवती' इत्यत्र धर्मिभूतायाः क्षितिधरकन्धरायाः प्रत्यक्षेणैव प्रसिद्धिः। 'ध्वनिः परिणतिमान्' इत्यत्र धर्मिणो–ध्वनेः प्रमाणेन विकल्पेन च प्रसिद्धिः, श्रूयमाणस्य शब्दस्य प्रत्यक्षप्रमाणेन, अतीतानागतयोस्तु विकल्पेन प्रसिद्धिरिति विवेकः ॥ २२ ॥

पक्षहेतुवचनात्मकं परार्थमनुमानम्, उपचारात् ॥ ३-२३ ॥

'पर्वतो वह्निमान् धूमात्' इत्याकारकं पक्षहेतुवचनात्मकं परार्थमनुमानम्, उपचारात्—पक्षहेतुवचनस्य जडत्वेन मुख्यतः प्रामाण्यासम्भवात्तत्रानुमानशब्दप्रयोगः कारणे कार्योपचारादौपचारिकः, बोधव्यगतं ज्ञानं कार्यं, तस्य च कारणं पक्षहेतुवचनम्। अथवा कार्ये कारणोपचारात्, वक्तृगतं स्वार्थानुमानं कारणं तस्य पक्षहेतुवचनं कार्यमिति ॥ २३ ॥

साध्यस्य प्रतिनियतधर्मिस ... ...
हेतोरुपसंहारवचनवत् पक्षप्रयोगोऽ
साश्रयितव्यः ॥ ३-२४ ॥

अयं भावः—बौद्धाः खलु पक्षप्रयोगं न ... ते हि कदाचित् "यो यो धूमवान् स स वह्निमान् महानसं धूमवांश्चायम्" इत्याकारकं व्याप्तिपुरस्सरं ... तोपसंहारं, कदाचित् "धूमवानयं यो यो धूमवान् स वह्निमान् यथा महानसम्" इत्याकारकं ... पूर्वकं व्याप्त्युपसंहारमेवानुमानं वदन्ति, तान् ... -कारयितुमाहुः—साध्यस्येत्यादि—यथा हेतोः ... सम्बन्धिता प्रसिद्ध्यर्थं, "धूमवांश्चायम्" इत्याकारक -रूपसंहारवचनं स्वीक्रियते, तथैव साध्यस्य ... -सम्बधिताप्रसिद्ध्यर्थं 'पर्वतो वह्निमान्' इत्याकारकः प्रयोगोऽप्यङ्गीकर्तव्य इति ॥ २४ ॥

त्रिविधं साधनमभिधायैव तत्समर्थनं
-यानः कः खलु न पक्षप्रयोगमङ्गीकुरुते ? ॥ ३-

कार्यस्वभावानुपलम्भभेदात् त्रिविधं साधनमभिधाय-उक्त्वा, असिद्धतादिनिरसनद्वारा स्वसाध्यसाधनसामर्थ्य-दर्शनरूपं तत्समर्थनं विदधानः-कुर्वाणः कः खलु पक्षप्रयोगं नाङ्गीकुरुते? अपि तु सर्वोऽपि प्रामाणिकः स्वीकुरुत इत्यर्थः। अयं भावः-पक्षप्रयोगमन्तरा त्रिविधस्य हेतोः समर्थनं निराश्रयं स्यात्, तस्मात् तत्समर्थनं कुर्वता सौगतेन पक्षप्रयोगोऽवश्यमङ्गीकर्तव्य एव ॥ २५ ॥

प्रत्यक्षपरिच्छिन्नार्थाभिधायिवचनं परार्थं प्रत्यक्षं, परप्रत्यक्षहेतुत्वात् ॥ ३-२६ ॥

यथानुमानेन प्रतीतोऽर्थः परं प्रति प्रतिपाद्यमानो वचनरूपापन्नः परार्थमनुमानमभिधीयते तथा प्रत्यक्षेणावगतोऽप्यर्थोऽन्यस्मै प्रतिपाद्यमानः परार्थं प्रत्यक्षमित्युच्यताम्, परप्रत्यायनस्योभयत्राप्यविशिष्टत्वादिति भावः ॥ २६ ॥

यथा पश्य पुरः स्फुरत्किरणमणिखण्डमण्डिताऽऽभरणभारिणीं जिनपतिप्रतिमाम ॥३-२७॥

पक्षहेतुवचनलक्षणमवयवद्वयमेव परप्रतिपत्ते-रङ्गं न दृष्टान्तादिवचनम् ॥ २-२८ ॥

'पर्वतो वह्निमान् धूमात्' इत्याकारकवाक्यं प्रतिपाद्यज्ञानं प्रति कारणं, न दृष्टान्तादिवचनम्, आदिपदेनोपनयनिगमनादयो गृह्यन्ते। एतेन व्याप्तिप्रदर्शनाय दृष्टान्तवचनोपेतं पक्षधर्मोपसंहाररूपमवयवत्रयं सौगतैः, पक्ष-हेतु-दृष्टान्तोपनयनिगमनस्वरूपं पञ्चावयवं नैया-वैशेषिकाभ्यामनुमानमाम्नातमिति नाभिमतं वेदितव्यम्। अवयवद्वयस्वीकारश्च व्युत्पन्नमतिप्रतिपाद्यापेक्षया द्रष्टव्यः। अतिव्युत्पन्नमतिप्रतिपाद्यापेक्षया तु 'धूमोऽत्र दृश्यते' इति हेतुप्रयोगमात्रात्मकमेवानुमानं भवति, "मन्दमतींस्तु व्युत्पादयितुं दृष्टान्तोपनयनिगमनान्यपि प्रयोज्यानि" [॥ ३-४२॥] इति वक्ष्यन्ति ॥ २८ ॥

हेतुप्रयोगस्तथोपपत्त्यन्यथानुपपत्तिभ्यां द्विप्रकारः ॥ २-२९ ॥

'वह्निसत्त्वे एव धूमसत्त्वम्' इत्याकारकतया-प्रकारेण हेतोरुपपत्तिस्तथोपपत्तिः, 'वह्न्यभावे धूमाभाव'

इत्याकारकसाध्याभावप्रकारेण हेतोरनुपपत्तिरन्यथानुपपत्तिः, ताभ्यामन्वयव्यतिरेकस्वरूपाभ्यां तथोपपत्त्यन्यथानुपपत्तिभ्यां हेतुप्रयोगो द्विभेद इत्यर्थः ॥ २९ ॥

सत्येव साध्ये हेतोरुपपत्तिस्तथोपपत्तिः, असति साध्ये हेतोरनुपपत्तिरेवान्यथानुपपत्तिः ॥३-३०॥

यथा कृशानुमानयं पाकप्रदेशः सत्येव कृशानुमत्त्वे, धूमवत्त्वस्योपपत्ते, असत्यनुपपत्तेर्वा ॥ ३-३१ ॥

असत्यनुपपत्तेः—असति कृशानुमत्त्वे धूमवत्त्वस्यानुपपत्तेरित्यर्थः ॥ ३१ ॥

अनयोरन्यतरप्रयोगेणैव साध्यप्रतिपत्तौ द्वितीयप्रयोगस्यैकत्रानुपयोगः ॥ ३-३२ ॥

अयं भावः—यत्र तथोपपत्तिप्रयोगेण साध्यसिद्धिः संजाता, तत्रान्यथानुपपत्तिप्रयोगस्य नोपयोगः, एवमन्यथाऽ-

नुपपत्तिप्रयोगेऽपि साध्यसिद्धौ संजातायां तथोपपत्तिप्र नोपयोग इति ॥ ३२ ॥

न दृष्टान्तवचनं परप्रतिपत्तये प्रभवति, तस्यां पक्षहेतुवचनयोरेव व्यापारोपलब्धेः ॥ ३-३३

नैयायिकादयो दृष्टान्तोपनयनिगमनान्यप्यनुमा ङ्गत्वेनाङ्गीकुर्वन्ति, तत्र तैर्दृष्टान्तवचनं किं परप्रतिप स्वीक्रियते ? उत व्याप्तिनिर्णयार्थं ? आहोस्विद् व्या स्मरणार्थम् ? इति विकल्पत्रयमुद्भाव्य प्रथमं विकल्पं यन्ति न दृष्टान्तवचनमिति—'पर्वतो वह्निमान् धूमवत्त्वान् थाऽनुपपत्तेः' इति पक्षहेतुवचनलक्षणावयवद्वयेनैवाविस्म सम्बन्धस्य साध्यप्रतिपत्तिसम्भवे दृष्टान्तवचनं निरर्थकमि भावः ॥ ३-३३ ॥

न च हेतोरन्यथाऽनुपपत्तिनिर्णीतये यथोक्त तर्कप्रमाणादेव तदुपपत्तेः ॥ ३-३४ ॥

द्वितीयविकल्पं दूषयन्ति न चेति—हेतोर्व्याप्ति मपि दृष्टान्तस्य नोपयोगः, तर्कप्रमाणादेव व्याप्तिनिर्णयो पपत्तेः ॥ ३४ ॥

नियतैकविशेषस्वभावे च दृष्टान्ते साकल्येन व्याप्तेरयोगतो विप्रतिपत्तौ तदन्तरापेक्षाया-मनवस्थितेर्दुर्निवारः समवतारः ॥ ३-३५ ॥

अयं भावः—पक्षे पर्वते वह्निधूमयोर्व्याप्तिनिर्णयार्थं यदि दृष्टान्तस्य महानसस्योपयोगः, तर्हि नियतैकविशेष-स्वरूपे दृष्टान्ते महानसे व्याप्तिनिर्णयः कथं जातः? इति वक्त-व्यम्, अन्येन दृष्टान्तेन चेत्, तत्रापि कथम्? अन्येन चेत्, अनवस्थादुस्तरा महानदी, तस्मात्तर्कप्रमाणादेव व्याप्ति-निर्णयोपपत्तौ तदर्थं दृष्टान्तवचनं न कर्तव्यमिति ॥ ३५ ॥

नाप्यविनाभावस्मृतये, प्रतिपन्नप्रतिबन्धस्य व्युत्पन्नमतेः पक्षहेतुप्रदर्शनेनैव तत्प्रसिद्धेः ॥ ३-३६ ॥

व्याप्तिस्मरणाय [illegible] दृष्टान्तवचनं न प्रभवति प्रतिपन्न-[illegible]स्य व्युत्पन्नमतेः 'पर्वतो वह्निमान् धूमवत्त्वान्यथानुपपत्तेः' इत्याकारकपक्षहेतुप्रदर्शनेनैव तत्प्र-सिद्धेः—व्याप्तिस्मरणस्य प्रसिद्धेः ॥ ३६ ॥

र्तते, अत इयमन्तर्व्याप्तिशब्देनोच्यते । 'अयं देशोऽग्निमान् धूमवत्त्वाद् यो यो धूमवान् स स वह्निमान् यथा पाकस्थानम्' अत्र पक्षीकृतविषयाद्देशादन्यत्र पाकस्थाने साधनस्य धूमस्य साध्येन वह्निना सह व्याप्तिर्वर्तते, अतो बहिर्व्याप्तिशब्देनोच्यते ॥ ३८–३९ ॥

नोपनयनिगमनयोरपि परप्रतिपत्तौ सामर्थ्यं पक्षहेतुप्रयोगादेव तस्याः सद्भावात् ॥ ३-४० ॥

न केवलं दृष्टान्तस्य परप्रतिपत्तावसामर्थ्यम्, अपि तु उपनयनिगमनयोरपि परप्रतिपत्तौ सामर्थ्यं नास्ति, पक्षहेतुप्रयोगादेव परप्रतिपत्तेः सद्भावात् ॥ ४० ॥

समर्थनमेव परं परप्रतिपत्त्यङ्गमास्तां, तदन्तरेण दृष्टान्तादिप्रयोगेऽपि तदसम्भवात् ॥ ३-४१ ॥

अयमर्थः—असिद्धत्वादिदोषनिरसनपूर्वकस्वसाध्यसाधनसामर्थ्यप्रदर्शनरूपं हेतोः समर्थनं विना दृष्टान्तादिप्रयोगेऽपि न साध्यसिद्धिर्भवितुमर्हतीति समर्थनमेव परप्रतिपत्त्यङ्गं भवतु किं दृष्टान्तादिप्रदर्शनेन ? ॥ ४१ ॥

व्युत्पन्नानाश्रित्य परार्थानुमानस्वरूपमुक्तं संप्रति मन्दमतीनाश्रित्य तत् प्रदर्शयन्ति—

मन्दमतींस्तु व्युत्पादयितुं दृष्टान्तोपनयनिगमनान्यपि प्रयोज्यानि ॥ ३-४२ ॥

अपिशब्दात्पक्षहेतू, पक्षादिषु सम्भाव्यमानदोषनिराकरणरूपाः शुद्धयश्च पञ्च ग्राह्याः ॥ ४२ ॥

प्रतिबन्धप्रतिपत्तेरास्पदं दृष्टान्तः ॥ ३-४३ ॥

प्रतिबन्धः-व्याप्तिः तस्याः प्रतिपत्तेः-स्मरणस्य, आस्पदं स्थानं-महानसादि दृष्टान्त इत्युच्यते ॥ ४३ ॥

स द्वेधा साधर्म्यतो वैधर्म्यतश्च ॥ ३-४४ ॥

समानो धर्मो यस्यासौ सधर्मा तस्य भावः साधर्म्यम् अन्वयः, विरुद्धो धर्मो यस्यासौ विधर्मा तस्य भावो वैधर्म्यं व्यतिरेकः, ताभ्यां साधर्म्यवैधर्म्याभ्यामन्वयव्यतिरेकाभ्यां दृष्टान्तो द्विभेद इत्यर्थः ॥ ४४ ॥

यत्र साधनधर्मसत्तायामवश्यं साध्यधर्मसत्ता प्रकाश्यते स साधर्म्यदृष्टान्तः ॥ ३-४५ ॥

* * * * *

*यथा यत्र यत्र धूमस्तत्र तत्र वह्निर्यथा महानसः [० सम् ?] ॥ ३-४६ ॥

* * * * *

यत्र तु साध्याभावे साधनस्यावश्यमभावः प्रदर्श्यते स वैधर्म्यदृष्टान्तः ॥ ३-४७ ॥

* * * * *

*यथाऽग्न्यभावे न भवत्येव धूमः, यथा जलाशये ॥ ३-४८ ॥

* * * * *

हेतोः साध्यधर्मिण्युपसंहरणमुपनयः ॥ ३-४९ ॥

*यथा धूमश्चात्र प्रदेशे ॥ ३-५० ॥

---

* इतीदं सूत्रत्रयमपि न मुद्रितं स्याद्वादरत्नाकरे । सं०

उपलब्धिर्विधिप्रतिषेधयोः सिद्धिनिबन्धनमनुपलब्धिश्च ॥ ३-५५ ॥

साध्यं द्विविधं विधिरूपं निषेधरूपं च, हेतुश्च द्विविध उपलब्धिरूपोऽनुपलब्धिरूपश्च, तत्र उपलब्धिरूपो हेतुर्विधिरूपस्य साध्यस्य साधकः, अनुपलब्धिरूपो हेतुर्निषेधरूपस्य साध्यस्य साधक इति येऽभिमन्यन्ते तान्निराकर्तुमाहुः—उपलब्धिरिति—

अयं भावः—यथा उपलब्धिर्विधिरूपस्य साध्यस्य साधिका तथा निषेधरूपस्यापि, एवमनुपलब्धिर्यथा निषेधरूपस्य साध्यस्य साधिका तथा विधिरूपस्यापि, तस्मादुपलब्धिर्विधिरूपस्यैव साध्यस्य साधिका, अनुपलब्धिर्निषेधरूपस्यैवेति नियमो न कर्तव्यः ॥ ५५ ॥

विधिः सदंशः ॥ ३-५६ ॥

सदसदात्मकस्य वस्तुनो यः सदंशः—भावरूपः स विधिरित्यर्थः ॥ ५६ ॥

प्रतिषेधोऽसदंशः ॥ ३-५७ ॥

सदसदात्मकस्य वस्तुनो योऽसदंशः—अभावरूपः स प्रतिषेध इति ॥ ५७ ॥

स चतुर्धा प्रागभावः प्रध्वंसाभाव इतरेतराभावोऽत्यन्ताभावश्च ॥ ३-५८ ॥

सः—प्रतिषेधः प्रागभावादिभेदेन चतुर्विध इत्यर्थः। वस्तुन उत्पत्तेः प्राग् अभावः प्रागभावः, प्रध्वंसरूपोऽभावः प्रध्वंसाभावः, इतरस्येतरस्मिन्नभाव इतरेतराभावः, अत्यन्तं कालत्रयेऽप्यभावोऽत्यन्ताभावः ॥ ५८ ॥

यन्निवृत्तावेव कार्यस्य समुत्पत्तिः सोऽस्य प्रागभावः ॥ ३-५९ ॥

यस्य पदार्थस्य—निवृत्तावेव नाशे एव सति, कार्यस्य समुत्पत्तिः स पदार्थः अस्य कार्यस्य प्रागभावः ॥ ५९ ॥

यथा मृत्पिण्डनिवृत्तावेव समुत्पद्यमानस्य घटस्य मृत्पिण्डः ॥ ३-६० ॥

मृत्पिण्डस्य नाशे सत्येव घटस्योत्पत्तिर्भवति अतः मृत्पिण्ड एव घटस्य प्रागभावः ॥ ६० ॥

यदुत्पत्तौ कार्यस्यावश्यं विपत्तिः सोऽस्य प्रध्वंसाभावः ॥ ३-६१ ॥

यस्य पदार्थस्योत्पत्तौ कार्यस्यावश्यं विपत्तिः-विनाशः स पदार्थः अस्य कार्यस्य प्रध्वंसाभावः ॥ ६१ ॥

यथा कपालकदम्बकोत्पत्तौ नियमतो विपद्यमानस्य कलशस्य कपालकदम्बकम् ॥ ३-६२ ॥

घटनाशमन्तरा कपालोत्पत्तिर्न भवतीति कपालकदम्बकं घटस्य प्रध्वंसाभावः ॥ ६२ ॥

स्वरूपान्तरात् स्वरूपव्यावृत्तिरितरेतराभावः ॥ ३-६३ ॥

स्वरूपान्तरात्-स्तम्भादिस्वरूपान्तरात्, स्वरूपव्यावृत्तिः-घटादिस्वरूपस्य व्यावृत्तिः, इतरेतराभावः-अन्योऽन्याभाव इत्यर्थः ॥ ६३ ॥

यथा स्तम्भस्वभावात् कुम्भस्वभावव्यावृत्तिः ॥ ३-६४ ॥

साध्येन सह विरुद्धस्य हेतोरुपलब्धिर्विरुद्धोपलब्धिरित्युच्यते ॥ ६७ ॥

तत्राविरुद्धोपलब्धिर्विधिसिद्धौ षोढा ॥३-६८॥

विधिरूपस्य साध्यस्य सिद्धावविरुद्धोपलब्धिः षोढा-षट्प्रकारेत्यर्थः ॥ ६८ ॥

षट्प्रकारानाहुः—

साध्येनाविरुद्धानां व्याप्य-कार्य-कारण-पूर्वचरोत्तरचर---सहचराणामुपलब्धिः ॥ ३-६९ ॥

साध्येनाविरुद्धस्य व्याप्यस्य, कार्यस्य, कारणस्य, पूर्वचरस्य, उत्तरचरस्य, सहचरस्य चोपलब्धिः, व्याप्याविरुद्धोपलब्धिः, कार्याविरुद्धोपलब्धिः, कारणाविरुद्धोपलब्धिः, पूर्वचराविरुद्धोपलब्धिः, उत्तरचराविरुद्धोपलब्धिः, सहचराविरुद्धोपलब्धिरित्यविरुद्धोपलब्धेः षड् भेदा इत्यर्थः ॥६९॥

तमस्विन्यामास्वाद्यमानादाम्रादिफलरसाद् एकसामग्र्यनुमित्या रूपाद्यनुमितिमभिमन्यमानैरभिमतमेव किमपि कारणं हेतुतया

पूर्वचरोत्तरचरयोः स्वभावे कार्ये कारणे वाऽन्तर्भावो न सम्भवति, तयोः स्वभावकार्यकारणभावयोः कालव्यवहितौ-कालव्यवधाने, अनुपलम्भात् ।

अयं भावः-साध्यसाधनयोस्तादात्म्ये सति स्वभावहेतावन्तर्भावो भवेत्, यथा-'अयं वृक्षः शिंशपात्वात्' इत्यस्य स्वभावेऽन्तर्भावः तथा साध्यसाधनयोः कार्यकारणभावे सति कार्यहेतौ कारणहेतौ वाऽन्तर्भावो विभाव्येत, यथा 'पर्वतो वह्निमान् धूमात्' इत्यस्य कार्ये, 'भविष्यति वर्षं तथाविधवारिवाहविलोकनात्' इत्यस्य कारणेऽन्तर्भावः । न च पूर्वचरोत्तरचरयोः स्वभावे कार्यकारणभावे वाऽन्तर्भावः सम्भवति, स्वभावकार्यकारणभावयोः कालव्यवधाने उपलम्भाभावात्, पूर्वचरोत्तरचरयोस्तु कालव्यवधानेऽपि उपलम्भो भवति तस्मान्न स्वभावे कार्ये कारणे वाऽन्तर्भावः ॥ ७१ ॥

न चातिक्रान्तानागतयोर्जाग्रद्दशासंवेदनमरणयोः प्रबोधोत्पातौ प्रति कारणत्वं, व्यवहितत्वेन निर्व्यापारत्वात् ॥ ३-७२ ॥

ननु वर्तमानप्रबोधं प्रति अतीतस्य जाग्रद्दशासंवेदनस्य, एवं सांप्रतिकं क्षुताऽऽशीत्यादिकमरिष्टं प्रति अनागतस्य

षाणयोरिव सहैवोत्पद्यमानत्वान्न कार्यं कारणे। ...
तस्मात्सहचरहेतोरपि प्रोक्तेषु स्वभावादिषु ...
इति ॥ ७६ ॥

ध्वनिःपरिणतिमान्, प्रयत्नानन्तरीयकत्वात्, यः प्रयत्नाऽनन्तरीयकः स परिणतिमान् यथास्तम्भः यो वा न परिणतिमान् स न प्रयत्नाऽनन्तरीयकः, यथा वान्ध्येयः, प्रयत्नानन्तरीयकश्च ध्वनिः, तस्मात् परिणतिमानिति व्याप्यस्य साध्येनाविरुद्धस्योपलब्धिः साधर्म्येण वैधर्म्येण च ॥ ३–७७ ॥

अत्र परिणतिमत्त्वेन साध्येनाविरुद्धस्य प्रयत्नाऽनन्तरीयकत्वस्य व्याप्यस्योपलब्धिर्वर्तते इति व्याप्याविरुद्धोपलब्धिः। यद्यपि धूमादिस्वरूपकार्यादिहेतूनामपि साध्य व्याप्यत्वं वर्तते तथापि तादृशव्याप्यत्वं नेह ... अपि तु कथञ्चित्साध्येन सह तादात्म्येन स्थितस्य ... नन्तरीयकत्वादेः स्वरूपमेव व्याप्यत्वेन विवक्षितं अत एव स्वभावोपलब्धिरित्यप्युच्यते ॥ ७७ ॥

अस्त्यत्र गिरिनिकुञ्जे धनञ्जयः, धूमसमुपलम्भात्, इति कार्यस्य ॥ ३-७८ ॥

अत्र साध्येन वह्निनाऽविरुद्धस्य कार्यस्य धूमस्योपलब्धिर्वर्तते इति कार्याविरुद्धोपलब्धिः ॥ ७८ ॥

भविष्यति वर्षं, तथाविधवारिवाहविलोकनात्, इति कारणस्य ॥ ३-७९ ॥

अत्र साध्येन वर्षेणाऽविरुद्धस्य तथाविधवारिवाहस्य कारणस्योपलब्धिः कारणाविरुद्धोपलब्धिः । एवं 'अस्त्यत्र छाया छत्रात्' इत्यप्युदाहरणं द्रष्टव्यम् ॥ ७९ ॥

उदेष्यति मुहूर्तान्ते तिष्यतारका, पुनर्वसूदयदर्शनात्, इति पूर्वचरस्य ॥ ३-८० ॥

तिष्यतारका–पुष्यनक्षत्रम् । अत्र साध्येन भविष्यत्तिष्यतारकोदयेनाविरुद्धस्य पुनर्वसूदयस्य पूर्वचरस्योपलब्धिरिति पूर्वचराविरुद्धोपलब्धिः। अश्विनी, भरणी, कृत्तिका, रोहिणी, मृगशीर्षम्, आर्द्रा, पुनर्वसू, पुष्यः, आश्लेषा, मघा, पूर्वाफल्गुनी, उत्तराफल्गुनी, हस्तः, चित्रा, स्वातिः, विशाखा,

अनुराधा, ज्येष्ठा, मूलम्, पूर्वाषाढा, उत्तराषाढा, अभिजित्, श्रवणः, धनिष्ठा, शतभिषक्, पूर्वाभद्रपदा, उत्तराभद्रपदा, रेवती, इति क्रमेणाष्टाविंशतिर्नक्षत्राणि ॥ ८० ॥

उदगुर्मुहूर्त्तात्पूर्वं पूर्वफल्गुन्यः, उत्तरफल्गुनीनामुदयोपलब्धेः, इत्युत्तरचरस्य ॥ ३-८१ ॥

अत्र साध्येनातीतपूर्वफल्गुन्युदयेनाविरुद्धस्य उत्तरफल्गुनीनामुद्गमस्योत्तरचरस्योपलब्धिः, इत्युत्तरचराविरुद्धोपलब्धिः ॥ ८१ ॥

अस्तीह सहकारफले रूपविशेषः, समास्वाद्यमानरसविशेषात्, इति सहचरस्य ॥ ३-८२ ॥

अत्र रूपविशेषेण साध्येनाविरुद्धस्य सहचरस्य रसविशेषस्योपलब्धिरिति सहचराविरुद्धोपलब्धिः ॥ ८२ ॥

विरुद्धोपलब्धिस्तु प्रतिषेधप्रतिपत्तेः सप्तप्रकारा ॥ ३-८३ ॥

प्रतिषेधात्मके साध्ये विरुद्धोपलब्धिः इत्यर्थः ॥ ८३ ॥

तत्राऽऽद्या स्वभावविरुद्धोपलब्धिः ॥ ३-८४ ॥

प्रतिषेध्यपदार्थेन यः स्वभावः—स्वरूपं तेन सह यत्साक्षाद्विरुद्धं तस्योपलब्धिः स्वभावविरुद्धोपलब्धिः ॥ ८४ ॥

यथा नास्त्येव सर्वथैकान्तः, अनेकान्तस्योपलम्भात् ॥ ३-८५ ॥

अत्र प्रतिषेध्यः सर्वथैकान्तः तत्स्वरूपेण सह साक्षाद्विरुद्धोऽनेकान्तः तस्योपलब्धिरिति स्वभावविरुद्धोपलब्धिः ॥ ८५ ॥

प्रतिषेध्यविरुद्धव्याप्तादीनामुपलब्धयः षट् ॥ ३-८६ ॥

प्रतिषेध्येनार्थेन सह ये साक्षाद्विरुद्धास्तेषां ये व्याप्तादयो व्याप्य-कार्य-कारण-पूर्वचरोत्तरचर-सहचरास्तेषामुपलब्धयः षट् तथाहि—विरुद्धव्याप्तोपलब्धिः, विरुद्धकार्योपलब्धिः, विरुद्धकारणोपलब्धिः, विरुद्धपूर्वचरोपलब्धिः, विरुद्धोत्तरचरोपलब्धिः, विरुद्धसहचरोपलब्धिश्चेति ॥ ८६ ॥

विरुद्धव्याप्तोपलब्धिर्यथा—नास्त्यस्य पुंसः तत्त्वेषु निश्चयः, तत्र सन्देहात् ॥ ३-८७ ॥

अत्र प्रतिषेध्यः तत्त्वेषु निश्चयः तेन साक्षाद्विरुद्धोऽनिश्चयः तस्य व्याप्यः सन्देहः, तस्योपलब्धिरिति विरुद्धव्याप्तोपलब्धिः ॥ ८७ ॥

विरुद्धकार्योपलब्धिर्यथा—न विद्यतेऽस्य क्रोधाद्युपशान्तिः, वदनविकारादेः ॥ ३-८८ ॥

अत्र प्रतिषेध्यः क्रोधाद्युपशमः तद्विरुद्धश्चानुपशमः, तत्कार्यस्य ताम्रत्वादिस्वरूपस्य वदनविकारादेरुपलब्धिरिति विरुद्धकार्योपलब्धिः ॥ ८८ ॥

विरुद्धकारणोपलब्धिर्यथा—नास्य महर्षेरसत्यं वचः समस्ति, रागद्वेषकालुष्याकलङ्कितज्ञानसम्पन्नत्वात् ॥ ३-८९ ॥

अत्र प्रतिषेध्यमसत्यं तद्विरुद्धं सत्यं तस्य कारणं रागद्वेषकालुष्याकलङ्कितं ज्ञानं तस्योपलब्धिरिति विरुद्धकारणोपलब्धिः ॥ ८९ ॥

विरुद्धपूर्वचरोपलब्धिर्यथा—नोद्गमिष्यति मुहूर्तान्ते पुष्यतारा, रोहिण्युद्गमात् ॥ ३-९० ॥

अत्र प्रतिषेध्यो भविष्यत्पुष्यतारोदयः तद्विरुद्धो मृगशीर्षोदयःतस्य पूर्वचरो रोहिण्युदयः तस्योपलब्धिरिति विरुद्धपूर्वचरोपलब्धिः ॥ ९० ॥

विरुद्धोत्तरचरोपलब्धिर्यथा—नोदगान् मुहूर्तात् पूर्वं मृगशिरः, पूर्वफल्गुन्युदयात् ॥ ३-९१ ॥

अत्र प्रतिषेध्यो मृगशीर्षोदयः तद्विरुद्धो मृगोदयःतदुत्तरचरः पूर्वफल्गुन्युदयःतस्योपलब्धिरिति विरुद्धोत्तरचरोपलब्धिः ॥ ९१ ॥

विरुद्धसहचरोपलब्धिर्यथा—नास्त्यस्य मिथ्याज्ञानं, सम्यग्दर्शनात् ॥ ३-९२ ॥

अत्र प्रतिषेध्यं मिथ्याज्ञानं तद्विरुद्धं सम्यग्ज्ञानं तस्य सहचरं सम्यग्दर्शनं तस्योपलब्धिरिति विरुद्धसहचरोपलब्धिः ॥ ९२ ॥

कार्यानुपलब्धिर्यथा—नास्त्यत्राऽप्रतिहतशक्तिकं बीजमङ्कुरानवलोकनात् ॥ ३-९८ ॥

अत्र प्रतिषेध्यं अप्रतिहतशक्तिविशिष्टं बीजं तत्कार्यमङ्कुरं तस्यानुपलब्धिरिति कार्यानुपलब्धिः ॥ ९८ ॥

कारणानुपलब्धिर्यथा—न सन्त्यस्य प्रशमप्रभृतयो भावाः, तत्त्वार्थश्रद्धानाभावात् ॥ ३-९९ ॥

अत्र प्रतिषेध्यं प्रशमप्रभृतयो भावाः—प्रशम-संवेग-निर्वेदानुकम्पाऽऽस्तिक्यस्वरूपात्मपरिणामविशेषा, तत्कारणं तत्त्वार्थश्रद्धान--सम्यग्दर्शनं. तस्यानुपलब्धिरिति कारणानुपलब्धिः । एवं नास्त्यत्र धूमो वह्न्यभावाद्, इत्यादीन्यप्युदाहरणानि ज्ञातव्यानि ॥ ९९ ॥

पूर्वचरानुपलब्धिर्यथा—नोद्गमिष्यति मुहूर्तान्ते स्वातिनक्षत्रं, चित्रोदयाऽदर्शनात् ॥ ३-१०० ॥

अत्र प्रतिषेध्यः स्वात्युदयः तत्पूर्वचरश्चित्रोदयस्तस्यानुपलब्धिरिति पूर्वचरानुपलब्धिः ॥ १०० ॥

उत्तरचरानुपलब्धिर्यथा-नोदगमत् पूर्वभाद्रपदा मुहूर्तात् पूर्वम्, उत्तरभद्रपदोद्गमाऽनवगमात् ॥ ३-१०१ ॥

अत्र प्रतिषेध्यः पूर्वभद्रपदोदयः तदुत्तरचरं उत्तरभद्रपदोदयः तस्यानुपलब्धिरित्युत्तरचरानुपलब्धिः ॥ १०१ ॥

सहचरानुपलब्धिर्यथा—नास्त्यस्य सम्यग्ज्ञानं, सम्यग्दर्शनानुपलब्धेः ॥ ३-१०२ ॥

अत्र प्रतिषेध्यं सम्यग्ज्ञानं तत्सहचरं सम्यग्दर्शनं तस्यानुपलब्धिरिति सहचरानुपलब्धिः ॥ १०२ ॥

विरुद्धानुपलब्धिस्तु विधिप्रतीतौ पञ्चधा ॥ ३-१०३ ॥

विधिस्वरूपे साध्ये विरुद्धानुपलब्धिः पञ्चप्रकारैरपर्थः ॥ १०३ ॥

विरुद्धकार्य—कारण—स्वभाव—व्यापक—सहचरानुपलम्भभेदात् ॥ ३-१०४ ॥

कार्यानुपलब्धिर्यथा—नास्त्यत्राऽप्रतिहतशक्तिकं बीजमङ्कुरानवलोकनात् ॥ ३-९८ ॥

अत्र प्रतिषेध्यं अप्रतिहतशक्तिविशिष्टं बीजं तत्कार्यमङ्कुरं तस्यानुपलब्धिरिति कार्यानुपलब्धिः ॥ ९८ ॥

कारणानुपलब्धिर्यथा—न सन्त्यस्य प्रशमप्रभृतयो भावाः, तत्त्वार्थश्रद्धानाभावात् ॥ ३-९९ ॥

अत्र प्रतिषेध्यं प्रशमप्रभृतयो भावाः—प्रशम-संवेग-निर्वेदानुकम्पाऽऽस्तिक्यस्वरूपात्मपरिणामविशेषाः, तत्कारणं तत्त्वार्थश्रद्धानं--सम्यग्दर्शनं, तस्यानुपलब्धिरिति कारणानुपलब्धिः । एवं नास्त्यत्र धूमो वह्न्यभावाद्, इत्यादीन्यप्युदाहरणानि ज्ञातव्यानि ॥ ९९ ॥

पूर्वचरानुपलब्धिर्यथा—नोद्गमिष्यति मुहूर्तान्ते स्वातिनक्षत्रं, चित्रोदयाऽदर्शनात् ॥ ३-१०० ॥

अत्र प्रतिषेध्यः स्वात्युदयः तत्पूर्वचरश्चित्रोदयस्तस्यानुपलब्धिरिति पूर्वचरानुपलब्धिः ॥ १०० ॥

"समस्त्यत्र प्रदेशे रत्ननिधानं" इत्यनेन लौकिकानां जनकादीनामाप्तत्वं प्रदर्शितं. "सन्ति रत्नसानुप्रभृतयः" इत्यनेन तु लोकोत्तराणां तीर्थकरादीनामाप्तत्वं निरूपितम् ॥३॥

अभिधेयं वस्तु यथाऽवस्थितं यो जानीते यथाज्ञानं चाभिधत्ते स आप्तः ॥ ४-४ ॥

* * * * *

तस्य हि वचनमविसंवादि भवति ॥ ४-५ ॥

हि—यस्मात् तस्य आप्तस्य वचनमविसंवादि—सफलप्रवृत्तिजनकं भवति तस्मात् स आप्त इति भावः ॥ ५ ॥

स च द्वेधा लौकिको लोकोत्तरश्च ॥ ४-६ ॥

* * * * *

लौकिको जनकादिर्लोकोत्तरस्तु तीर्थकरादिः ॥ ४-७ ॥

अत्राऽऽहुर्मीमांसकाः—नहि पौरुषेयस्याऽऽगमस्य प्रामाण्यं भवितुमर्हति, भ्रमप्रमादादिदोषसुलभत्वात्पुरुषस्य, न

"प्रजापतिः सोमं राजानमन्वसृजत् तत्र त्रयो वेदा अन्वसृजन्त" "प्रतिमन्वन्तरं चैषा श्रुतिरन्या विधीयते" इत्याद्यागमेनापि वेदस्य पौरुषेयत्वमेव प्रतीयते, इति न कथमपि वेदस्याऽपौरुषेयत्वं सिद्धिपथमायाति नतरां प्रामाण्यमिति ॥ ७ ॥

वर्णपदवाक्यात्मकं वचनम् ॥ ४-८ ॥

* * * * *

अकारादिः पौद्गलिको वर्णः ॥ ४-९ ॥

पुद्गलैः—भाषावर्गणापरमाणुभिरारब्धः पौद्गलिकः। एतेन वर्णनित्यत्ववादिनो मीमांसकाः, गगनगुणत्ववादिनो नैयायिकाश्च निरस्ता वेदितव्याः तथाहि—वर्णानामुत्पत्तिविनाशयोः प्रत्यक्षेण वीक्ष्यमाणत्वान्नित्यत्वं न सम्भवति, न च 'सोऽयं गकारः' इति प्रत्यभिज्ञाबलाद् वर्णानां नित्यत्वं सिध्यति, अस्याः प्रत्यभिज्ञायाः 'सेयं दीपज्वाला' 'तदेवेदमौषधम्' इत्यादिवत् सजातीयविषयत्वेन भ्रान्तत्वात्। एवं 'शब्दो न गगनगुणः, अस्मदादिप्रत्यक्षत्वाद् रूपादिवत्' इत्यनुमानबाधितत्वाद् गगनगुणत्वमपि न सिध्यति, तस्माद्

स्वाभाविकसामर्थ्यसमयाभ्यामर्थबोधनिबन्धनं शब्दः ॥ ४-११ ॥

स्वाभाविकसामर्थ्य–शब्दस्यार्थप्रतिपादिका शक्तिः, समयः--संकेतः ताभ्यां कृत्वा अर्थज्ञानस्य कारणं शब्द इति।

अयं भावः—यद्यपि अर्थप्रतिपादने शब्दस्य स्वाभाविकं सामर्थ्यमस्ति तथापि सहकारित्वेन संकेतमपेक्षते, अन्यथा अज्ञातसंकेतस्यापि पुंसः शब्दश्रवणमात्रेणार्थोपस्थितिः स्यात्, न चैवं दृश्यते। ननु तर्हि संकेतेनैव शब्दस्यार्थबोधकत्वमङ्गीक्रियतां किमर्थं तत्र स्वाभाविकसामर्थ्यं स्वीक्रियते ? इति चेत्, उच्यते–संकेतस्य पुरुषेच्छाधीनत्वात् कदाचित् 'शब्दोऽपि वाच्यः अर्थोऽपि वाचकः' इति विपरीतमपि स्यात् सामर्थ्येऽङ्गीक्रियमाणे तु नैवं भवितुमर्हति, तस्मात् सामर्थ्यसंकेताभ्यां शब्दस्यार्थावबोधकत्वमङ्गीकरणीयमिति ॥ ११ ॥

अर्थप्रकाशकत्वमस्य स्वाभाविकं प्रदीपवद् यथार्थाऽयथार्थत्वे पुनः पुरुषगुणदोषावनुसरत ॥ ४-१२ ॥

अर्थावबोधकत्वं स्वाभाविकमेव, यथार्थाऽयथार्थप्रतिपादकत्वं तु पुरुषगुणदोषावनुसरतः। यदि पुरुषः सम्यग्दर्शी

इदमत्राऽऽकूतम्—जीवाजीवात्मकं सर्वं हि वस्तुजातमनन्तधर्मात्मकमिति सिद्धान्तः। तत्रैकैकधर्ममवलम्ब्य सप्तविधप्रश्नवशात् सप्तधावाक्यं प्रवर्तते। उद्देश्यविधेयात्मकं हि वाक्यं भवति, एवञ्च कस्मिंश्चिद्वस्तुनि कमपि धर्ममवलम्ब्योद्देश्यविधेयात्मकं सप्तधैव वचनविन्यासः प्रवर्तते नाधिकं नाऽपि न्यूनं, तथाहि—घटे अस्तित्वधर्ममवलम्ब्य 'स्यादस्त्येव घटः' 'स्यान्नास्त्येव घटः' 'स्यादस्ति नास्ति च घटः' 'स्यादवक्तव्य एव घटः' 'स्यादस्ति चावक्तव्यश्च घटः' 'स्यान्नास्ति चावक्तव्यश्च घटः' 'स्यादस्ति नास्ति चावक्तव्यश्च घटः' इति सप्तभङ्गाः प्रवर्तन्ते।

प्रश्नानां सप्तविधत्वञ्च प्रश्नकर्तुः सप्तविधजिज्ञासोदयात्। जिज्ञासायाः सप्तविधत्वं सप्तविधसंशयसमुद्भवात्। सन्देहस्यापि सप्तविधत्वं संदेहविषयीभूतधर्माणां कथञ्चिदस्तित्वादीनां सप्तविधत्वात्। तथाहि—कथञ्चिदस्तित्वं, कथञ्चिन्नास्तित्वं, कथञ्चित्क्रमार्पितोभयत्वं, कथञ्चिदवक्तव्यत्वं, कथञ्चिदस्तित्वविशिष्टावक्तव्यत्वं, कथञ्चिन्नास्तित्वविशिष्टावक्तव्यत्वं, कथञ्चित्क्रमार्पितोभयविशिष्टावक्तव्यत्वमिति। एवं च वस्तुषु प्रतिपर्यायमवलम्ब्य सप्तविधसंशयविषयीभूतधर्माणां विद्यमानत्वाद् घटः स्यादस्ति न वा ? इति

कथञ्चित्सत्त्वसर्वथासत्त्वरूपविरुद्धकोटिद्वयात्मकः संश-
यमासादयति, संशयेन च घटं वास्तवि [illegible]
जिज्ञासोत्पद्यते, ततो घटः किं स्यादस्त्येव ? इति प्रश्न
पर्यवसाने तादृशप्रश्नवशात् प्रतिपादयितुः प्रतिपिपादयि-
षा जायते, ततः प्रतिपादयति, तथा च प्रश्नानां सप्तधैव प्रव-
र्तमान[illegible]त्तरस्यापि सप्तविधत्वमेव प्रवक्तं भवति ।

इयं सप्तभङ्गी प्रमाणसप्तभङ्गी-नयसप्तभङ्गीभेदेन द्विविधा
[illegible] सकलादेशस्वभावा प्रमाणसप्तभङ्गी । प्रति-
[illegible] विकलादेशस्वभावा च नयसप्तभङ्गी । एकधर्मबोधन-
[illegible] अभेदवृत्त्या अभेदोपचाराद्वा तदात्मकानेकाशेषधर्मा-
[illegible] सकलादेशत्वम् । का
[illegible] प्रतिपादयति ? कुत्र चाभेदोपचारेण ? इति चे-
[illegible] द्रव्यार्थिकनयप्राधान्ये सर्वपर्यायाणां द्रव्याद-
[illegible] इति [illegible] कालादिभिः कथंचि-
[illegible] सकलधर्मात्मकं वस्तु अभेदवृत्त्या प्र-
[illegible] । पर्यायार्थिकनयप्राधान्ये तु सर्वपर्यायाणां परस्प-
[illegible] कालादिभिः [illegible] सामर्थ्याभा-
[illegible] प्रतिपादयति । अनेक-
[illegible] विवक्ष-
[illegible] इति ॥ १४ ॥

तद्यथा स्यादस्त्येव सर्वमिति विधिकल्पनया प्रथमो भङ्गः ॥ ४-१५ ॥

अत्र स्यात्पदमनेकान्तद्योतकम्. 'अस्त्येव सर्वं कुम्भादि' इत्युक्ते स्वरूपेणास्तित्वमिव पररूपेणाप्यस्तित्वं प्राप्नोति तद्व्यावृत्त्यर्थं स्यात्पदं. तेन च स्यात् कथञ्चित्स्वद्रव्यक्षेत्रकालभावैरेव कुम्भोऽस्ति न परद्रव्यक्षेत्रकालभावैरित्यर्थो लभ्यते। तथाहि—कुम्भो द्रव्यतः पार्थिवत्वेनास्ति नाऽऽप्यादित्वेन. देशतः पाटलिपुत्रत्वेनास्ति न कान्यकुब्जत्वेन, कालतः वासन्तिकत्वेनास्ति न शैशिरत्वेन. भावतः श्यामत्वेनास्ति न रक्तत्वेन।

'स्यादस्त्येव सर्वम्' इत्यत्र स्वरूपादिभिरस्तित्वमिव स्वरूपादिभिरेव नास्तित्वमपि स्यात् तद्व्यावृत्त्यर्थमेवकारग्रहणं, तेन चायमर्थो लभ्यते—यत् स्वरूपादिभिरस्त्येव सर्वं वस्तु न तु नास्त्यपि. पररूपादिभिर्नास्तित्वं तु इष्टमेव।

एवकारस्त्रिधा—अयोगव्यवच्छेदकः. अन्ययोगव्यवच्छेदकः. अत्यन्तायोगव्यवच्छेदकश्च। तत्र विशेषणसंगतैवकारोऽयोगव्यवच्छेदकः। अयोगव्यवच्छेदकत्वं नाम—उद्देश्यतावच्छेदकसमानाधिकरणाऽभावाप्रतियोगित्वं. यथा

'शंखः पाण्डुर एव' इत्यत्रोद्देश्यतावच्छेदकं शङ्खत्वं, तत्समानाधिकरणात्यन्ताभावो न तावत्पाण्डुरत्वात्यन्ताभावोऽपि तु पीतत्वाद्यत्यन्ताभावः, तत्प्रतियोगित्वं पीतत्वादौ, अप्रतियोगित्वं पाण्डुरत्वे वर्तत इति लक्षणसमन्वयः। विशेष्यसंगतैवकारोऽन्ययोगव्यवच्छेदकः। अन्ययोगव्यवच्छेदकत्वं च विशेष्यभिन्नतादात्म्यादिव्यवच्छेदः, यथा—'पार्थ एव धनुर्धरः, अत्र पार्थान्यतादात्म्याभावो धनुर्धरे एवकारेण बोध्यते। क्रिया संगतैवकारश्चात्यन्तायोगव्यवच्छेदकः। अत्यन्ताऽयोगव्यवच्छेदकत्वं नाम—उद्देश्यतावच्छेदकव्यापकाऽभावाऽप्रतियोगित्वं, यथा—'नीलं सरोजं भवत्येव' इत्यत्र उद्देश्यतावच्छेदकं सरोजत्वं तद्व्यापकोऽत्यन्ताऽभावो नो नीलाऽभेदाऽभावोऽपि तु पटाऽभेदाऽभावः, तत्प्रतियोगित्वं पटाऽभेदे, अप्रतियोगित्वं नीलाऽभेदे वर्तत इति लक्षणसमन्वयः।

ननु'स्यादस्त्येव सर्वम्' इत्यादौ एवकारस्य क्रियासंगतत्वादत्यन्ताऽयोगव्यवच्छेदेन भवितव्यं, तथा सति विवक्षिताऽर्थाऽसिद्धिः स्यात्, कस्मिंश्चिद् घटे अस्तित्वस्याभावेऽपि 'स्यादस्त्येव घटः' इत्याकारकप्रयोगसम्भवात्, यथा कस्मिंश्चित् सरोजे नीलत्वाऽभावेऽपि 'नीलं सरोजं भवत्येव' इत्या-

धारकप्रयोग इति चेत्, न। *राद्धान्तेऽन्त्रायोगव्यवच्छेदक-स्यैवकारस्य स्वीकृतत्वात्, क्रियासंगतैवकारोऽपि क्वचिदयोगव्यवच्छेदबोधको भवति यथा—'ज्ञानमर्थं गृह्णात्येव' इत्यत्र ज्ञानत्वसमानाधिकरणाऽत्यन्ताऽभावाऽप्रतियोगित्वस्य अर्थग्राहकत्वे बोधः। एवं 'स्यादस्त्येव घटः' इत्यादिष्वपि अयोगव्यवच्छेदक एव एवकारो बोद्धव्यः।

यद्यपि राद्धान्ते सत्त्वमिवाऽसत्त्वमपि घटस्य स्वरूपमेव तथापि 'स्यादस्त्येव घटः' इत्यत्र सत्त्वस्य प्राधान्येन भानम्, असत्त्वस्य चाप्राधान्येन। एवं द्वितीयभङ्गे नास्तित्वस्य प्राधान्येन अस्तित्वस्य चाप्राधान्येन भानम्। एवमन्यभङ्गेष्वपि ज्ञातव्यम् ॥ १५ ॥

स्यान्नास्त्येव सर्वमिति निषेधकल्पनया द्वितीयः ॥ ४-१६ ॥

'परद्रव्यक्षेत्रकालभावैः कथञ्चिन्नास्त्येव कुम्भादिः' इति निषेधकल्पनया द्वितीयो भङ्गः ॥ १६ ॥

स्यादस्त्येव नास्त्येवेति क्रमतो विधिनिषेधकल्पनया तृतीयः ॥ ४-१७ ॥

---

* सिद्धान्ते। प्रकृते तु जैनसिद्धान्ते इति बोध्यम्। संशोधकः

परद्रव्यादिचतुष्टयापेक्षया नास्तित्वे सति अस्तित्वनास्तित्वाभ्यां यौगपद्येन वक्तुमशक्यं सर्वं वस्तु, इति स्यान्नास्तित्वविशिष्टस्यादवक्तव्यमेवेति षष्ठो भङ्गः ॥ २० ॥

स्यादस्त्येव स्यान्नास्त्येव स्यादवक्तव्यमेवेति क्रमतो विधिनिषेधकल्पनया, युगपद्विधिनिषेधकल्पनया च सप्तम इति ॥ ४-२१ ॥

क्रमतः स्वद्रव्यादिचतुष्टयापेक्षयाऽस्तित्वे सति परद्रव्यादिचतुष्टयापेक्षया नास्तित्वे च सति यौगपद्येनाऽस्तित्वनास्तित्वाभ्यां वक्तुमशक्यं सर्वं वस्तु, इति सप्तमो भङ्गः ॥ २१ ॥

विधिप्रधान एव ध्वनिरिति न साधु ॥ ४-२२ ॥

'शब्दः प्राधान्येन विधिमेवाभिधत्ते न निषेधम्' इति कथनं न युक्तमित्यर्थः ॥ २२ ॥

अत्र हेतुमाहुः—

निषेधस्य तस्मादप्रतिपत्तिप्रसक्तेः ॥ ४-२३ ॥

शब्दो यदि एकान्तेन विधिबोधक एव भवेत् तर्हि तस्मात् निषेधस्य ज्ञानं कदापि न स्यात्, निषेधज्ञानं तु

अनुभवसिद्धं, तस्मान्न विधिबोधक एव शब्दः किन्तु निषेधबोधकोऽपीति भावः ॥ २३ ॥

अप्राधान्येनैव ध्वनिस्तमभिधत्त इत्यप्यसारम् ॥ ४-२४ ॥

ननु भवतु शब्दो निषेधबोधकोऽपि तथाऽपि अप्रधानभावेनैव तमभिधत्ते इति चेत्, तदप्यसारम् ॥ २४ ॥

अत्र कारणमाहुः—

क्वचित् कदाचित् कथञ्चित् प्राधान्येनाऽप्रतिपन्नस्य तस्याऽप्राधान्याऽनुपपत्तेः ॥ ४-२५ ॥

निषेधस्य कुत्राचित् प्राधान्येन भानाऽभावेऽन्यत्राऽप्राधान्येन भानं न भवितुमर्हति तस्मात् शब्दः कुत्राचित् प्राधान्येनापि निषेधमभिधत्ते इत्यङ्गीकरणीयम् ॥ २५ ॥

निषेधप्रधान एव शब्द इत्यपि प्रागुक्तन्यायादपास्तम् ॥ ४-२६ ॥

शब्दो यदि प्रधानभावेन निषेधमेवाभिदध्यात् तर्हि विधिबोधको न स्यात्, अप्रधानभावेन विधि बोधयति चेत्, कुत्रचित् प्रधानभावेन बोधकत्वमन्तराऽन्यत्राऽप्रधान

भावेन बोधकत्वासम्भवात्, तस्माद् 'निषेधप्रधान एव शब्दः' इति एकान्तोऽपि न समीचीन इति भावः ॥ २६ ॥

क्रमादुभयप्रधान एवायमित्यपि न साधीयः ॥ ४-२७ ॥

अयं शब्दः 'स्यादस्त्येव घटः स्यान्नास्त्येव घटः' इत्याकारकं क्रमार्पितोभयमेवाभिधत्ते इत्यपि न साधु ॥२७॥

अस्य विधिनिषेधान्यतरप्रधानत्वानुभवस्याप्यबाध्यमानत्वात् ॥ ४-२८ ॥

अस्य—शब्दस्य विधिप्राधान्येन निषेधप्राधान्येन च स्वातन्त्र्येणानुभूयमानत्वात् 'क्रमादुभयप्रधान एवायम्' इति तृतीयभङ्गैकान्तोऽपि न कान्तः ॥ २८ ॥

युगपद्विधिनिषेधात्मनोऽर्थस्याऽवाचक एवासाविति *वचो न चतुरस्रम् ४-२९ ॥

* अत्र यद्यपि स्याद्वादरत्नाकरावतारिकानुसारेणैव सूत्राणि मुद्रितानि, स्याद्वादरत्नाकरावतारिकायां च '*च न चतुरस्रम्' इति पाठो वर्तते तथाऽपि अन्यमुद्रितपुस्तके, हस्तलिखितपुस्तके च 'वचो न चतुरस्रम्' इत्येव पाठो दृश्यते. अस्माभिर

निषेधात्मनः सह द्वयात्मनश्चार्थस्य वाचकत्वाऽवाचकत्वाभ्यामपि शब्दस्य प्रतीयमानत्वात् ॥ ४-३२ ॥

'स्यान्नास्ति चावक्तव्यश्च' इति षष्ठभङ्गे निषेधात्मनोऽर्थस्य वाचकत्वेन सह युगपत् प्रधानभावेन विधिनिषेधात्मनोऽर्थस्याऽवाचकश्च शब्दः प्रतीयते तस्मात् पञ्चमभङ्गैकान्तोऽपि न समीचीनः ॥ ३२ ॥

निषेधात्मनोऽर्थस्य वाचकः सन्नुभयात्मनो युगपदवाचक एवायमित्यप्यवधारणं न रमणीयम् ॥ ४-३३ ॥

'कथञ्चिन्नास्तित्वविशिष्टकथञ्चिदव्यक्तस्वभावस्य वस्तुन एव वाचकः शब्दः' इति षष्ठभङ्गैकान्तोऽपि न रमणीय इत्यर्थः ॥ ३३ ॥

अत्र हेतुं प्रदर्शयन्ति—

इतरथाऽपि संवेदनात् ॥ ४-३४ ॥

प्रथमभङ्गादिषु विध्यादिप्राधान्येनापि शब्दस्य प्रतीयमानत्वात् षष्ठभङ्गैकान्तोऽपि न समीचीन इति भावः

क्रमाक्रमाभ्यामुभयस्वभावस्य भावस्य वाचक [illegible] ध्वनिर्नान्यथेत्यपि मिथ्या ॥ ४-३९ ॥

[illegible] स्वभावस्य वस्तुन [illegible] मिथ्या ॥ ३४ ॥

अत्र [illegible] —

[illegible] ऽपि तस्य प्रतीतेः ॥ ४-४० ॥

[illegible] इति [illegible] ॥ [illegible] ॥

[illegible] ॥ ४-४१ ॥

[illegible]

मार्गाः स्युः, कथं सप्तैव भङ्गाः? इति मनसि न करणीयम् ॥ ३७ ॥

अत्र कारणमाहुः—

विधिनिषेधप्रकारापेक्षया प्रतिपर्यायं वस्तुन्यनन्तानामपि सप्तभङ्गीनामेव सम्भवात् ॥ ४-३८ ॥

प्रतिपर्यायमवलम्ब्य वस्तुनि सप्तैव भङ्गाः सम्भवन्ति नाऽनन्ताः, सप्तभङ्गीनामानन्त्यं तु इष्टमेवेति न दोषः, इति भावः ॥ ३८ ॥

कुतः प्रतिपर्यायमवलम्ब्य सप्तैव भङ्गाः सम्भवन्ति? इत्यत आहुः—

प्रतिपर्यायं प्रतिपाद्यपर्यनुयोगानां सप्तानामेव सम्भवात् ॥ ४-३९ ॥

प्रतिपर्यायमाश्रित्य सप्तानामेव शिष्यप्रश्नानां सम्भवादुत्तरमपि सप्तभङ्गात्मकमिति भावः ॥ ३९ ॥

प्रश्नानां सप्तविधत्वे हेतुं प्रदर्शयन्ति—

प्रमाणप्रतिपन्नानन्तधर्मात्मकवस्तुनः कालादिभिरभेदवृत्तिप्राधान्यादभेदोपचाराद्वा यौगपद्येन प्रतिपादकं वचः सकलादेशः ॥ ४-४४॥

यौगपद्येनानन्तधर्मात्मकं वस्तु प्रतिपादयति सकलादेशः।

अयमर्थः—सकलादेशत्वेन विवक्षितं 'स्यादस्त्येव घटः' इदं वाक्यं न केवलमस्तित्वधर्मविशिष्टं घटं बोधयति किन्तु अनन्तधर्मात्मकं घटं प्रकाशयति। ननु कथमस्तित्वधर्मविशिष्टवस्तुबोधकमिदं वाक्यमनन्तधर्मात्मकवस्तुबोधकम्? इति चेत्, उच्यते—सर्वधर्माणामस्तित्वात्मकत्वाद् एकधर्मविशिष्टवस्तुप्रतिपादनद्वारा इदं वाक्यं अनन्तधर्मात्मकं वस्तु प्रतिपादयति। ननु सर्वधर्माणामस्तित्वात्मकत्वमेव न सम्भवति, परस्परभिन्नत्वात्सर्वधर्माणामिति चेत्, न, कालादिभिरभेदवृत्तिप्राधान्यादभेदोपचाराद्वा अस्तित्वाख्यस्य धर्मस्यानन्तधर्मात्मकत्वोपपत्तेः, तथाहि—यदा कालादिभिरष्टाभिः कृत्वा अभेदवृत्तेः—धर्मधर्मिणोरभेदस्य प्राधान्यमङ्गीक्रियते तदा कालादिभिः समस्तधर्माणां तादात्म्येनावस्थितत्वात् 'स्यादस्त्येवघटः' इतिवाक्यमेकधर्मविशिष्टवस्तुप्रतिपादन-

-मुख्येन यौगपद्येनाऽनन्तधर्मात्मकं वस्तु प्रतिपादयति। [illegible] कालादयः? इति चेत्, उच्यते—कालः, आत्मरूपम्, [illegible] सम्बन्धः, उपकारः, गुणिदेशः, संसर्गः, शब्दश्चेत्यष्टौ।

तत्र 'स्यादस्त्येव घटः' इत्यत्र घटादौ यत्कालाव[illegible] [illegible]स्तित्वं [illegible] तत्कालावच्छेदेन शेषा अनन्तधर्मा अपि [illegible] सन्ति इति कालेनाऽभेदवृत्तिः। यदेवास्तित्वस्य घटगुण[illegible] [illegible]-आत्मरूपं तदेवान्यसर्वगुणानामिति आत्मरूपे[illegible] [illegible]भेदवृत्तिः। य एव च घटद्रव्यरूपोऽर्थोऽस्तित्वस्याऽऽधारः [illegible]र्थेनाऽभेदवृत्तिः। य एव चाविभा[illegible] [illegible] तादात्म्यस्वरूपोऽस्तित्वस्य सम्बन्धः स एवा[illegible] [illegible]पीति सम्बन्धेनाऽभेदवृत्तिः। य एव चोपकारोऽ[illegible] [illegible]नुरक्तत्वकरणं—[illegible]विशिष्टज्ञानसम्पादनं—स्वप्रकार[illegible] [illegible]ज्ञानजनकत्वं [illegible], (अस्तित्वस्य स्वानु[illegible] [illegible] हि अस्तित्ववान् घट इति विशिष्टज्ञानजनकत्वम्) [illegible] उपकारेणाऽभेदवृत्तिः। [illegible] गुणिनः [illegible] देशः [illegible]स्तित्वस्य स ए[illegible] [illegible] गुणिदेशेनाऽभेदवृत्तिः। य एव चैक[illegible] [illegible] संसर्गः स [illegible]न्यधर्माणामपीति सं[illegible] [illegible]। ननु सम्बन्धसंसर्गयोः को विशेषः? इति

उच्यते-द्रव्यपर्याययोः कथञ्चिद् भिन्नाऽभिन्नत्वाऽपरपर्याय-कथञ्चित्तादात्म्यलक्षणः सम्बन्धः संसर्गश्च तत्र यदा अभेदस्य प्राधान्यं भेदस्य च गौणत्वं विवक्ष्यते तदा सम्बन्धः। यदा तु भेदस्य प्राधान्यमभेदस्य च गौणत्वं विवक्ष्यते तदा संसर्ग इत्युच्यते। य एवास्तीतिशब्दोऽस्तित्वधर्मात्मकस्य वस्तुनो वाचकः स एव अनन्तपर्यायात्मकस्य वस्तुनो वाचक इति शब्देनाभेदवृत्तिः।

एवं कालादिभिरष्टविधाऽभेदवृत्तिः पर्यायार्थिकनयस्य गुणभावे द्रव्यार्थिकनयप्राधान्यादुपपद्यते। द्रव्यार्थिकनयगुणभावे पर्यायार्थिकनयप्राधान्ये तु न गुणानामभेदवृत्तिः सम्भवतीति कालादिभिर्भिन्नानाममपि गुणानामभेदोपचारः क्रियते इति। एवं कालादिभिरभेदवृत्त्या अभेदोपचारेण वा यौगपद्येनानन्तधर्मात्मकस्य वस्तुनः प्रतिपादकं वाक्यं सकलादेश इत्युच्यत इति ॥४४॥

तद्विपरीतस्तु विकलादेशः ॥४५॥

नयविषयीकृतस्य वस्तुधर्मस्य यदा कालादिभिर्भेदविवक्षा क्रियते तदा एकस्य शब्दस्यानेकार्थप्रतिपादने सामर्थ्याभावाद् भेदवृत्त्या भेदोपचारेण वा क्रमेण यदभिधायकं वाक्यं स विकलादेश इत्यर्थः

* "निर्विशेषं हि सामान्यं भवेत् खरविषाणवत्।
सामान्यरहितत्वेन विशेषास्तद्वदेव हि ॥"

तदेवं वस्तुनः सामान्यविशेषात्मकत्वस्य प्रतीयमानत्वेऽपि तदुभयैकान्तवादः स्वतन्त्रवादश्च प्रतीतिपराहत एवेति संक्षेपः ॥१॥

इदानीं हेतुद्वयेन वस्तुनः सामान्यविशेषात्मकत्वं प्रसाधयन्ति—

अनुगतविशिष्टाऽऽकारप्रतीतिविषयत्वात्, प्राचीनोत्तराऽऽकारपरित्यागोपादानावस्थानस्वरूपपरिणत्याऽर्थक्रियासामर्थ्यघटनाच्च ॥ ५-२ ॥

वस्तु सामान्यविशेषात्मकम्, अनुगतविशिष्टाकारप्रतीतिविषयत्वात्। तत्र 'अयं गौरयं गौः' इत्याकारा सदृशपरिणामलक्षणसामान्यगोचरा प्रतीतिरनुगताकारा प्रतीतिः। 'शबलोऽयं श्यामलोऽयम्' इत्याकारा गुणकृतविशेषगोचरा प्रतीतिः विशिष्टाकारा प्रतीतिः। इति निर्दिष्टाभ्यामनुगता-

* श्लोकोऽयं [illegible]
[illegible]
[illegible] । [illegible]

कपविशेषलक्षणानेकान्तात्मकवस्तुसिद्धौ हेतुः । प्राचीनो-त्तराऽऽकार-परित्यागोपादानावस्थानस्वरूपपरिणत्या-पूर्वाऽऽकारस्य परित्याग उत्तराकारस्य च स्वीकारः ताभ्यां सह ध्रुवस्याऽवस्थानं तत्स्वरूपा या परिणतिः तया परिणामिनोऽर्थक्रियासामर्थ्यघटनात् कार्यकरणोपपत्तेः, इत्यूर्ध्वतासामान्यविशेषपर्यायरूपानेकान्तात्मकवस्तुसिद्धौ हेतुः ॥२

सामान्यं द्विप्रकारं तिर्यक्सामान्यम् ऊर्ध्वतासामान्यं च ॥ ५-३ ॥

तत्र तिर्यक्सामान्यं यथा-गोत्वघटत्वादि । ऊर्ध्वतासामान्यं यथा मृद्द्रव्यादि ॥३॥

प्रतिव्यक्ति तुल्या परिणतिस्तिर्यक्सामान्यं शबलशाबलेयादिपिण्डेषु गोत्वं यथा ॥ ५-४ ॥

प्रतिव्यक्ति भिन्नभिन्नव्यक्तिषु या तुल्या परिणतिः सदृशपरिणामः तत् तिर्यक्सामान्यं, यथा-शबलशाबलेयादि-पिण्डेषु गोत्वम् ॥ ४ ॥

पूर्वापरपरिणामसाधारणं द्रव्यमूर्ध्वतासामान्यं कटककङ्कणाद्यनुगामिकाञ्चनवत् ॥५-५॥

कटकं भंक्त्वा कङ्कणे विधीयमाने पूर्वपरिणामः कटकस्वरूपः, उत्तरपरिणामः कङ्कणस्वरूपः तयोः पूर्वोत्तरपरिणामयोरनुगतं यत्सुवर्णाऽऽख्य द्रव्यं तदूर्ध्वतासामान्यमित्यर्थः ॥ ५ ॥

विशेषोऽपि द्विरूपो गुणः पर्यायश्च ॥५-६॥

गोत्वलक्षणातिर्यक्सामान्यविशिष्टेषु गोपिण्डेषु, शबलशाबलेयादयो गुणा विशेषशब्दाभिधेयाः । ऊर्ध्वतासामान्यस्वरूपेषु सुवर्णादिद्रव्येषु कटककङ्कणादयः पर्याया विशेषपदवाच्या इति भावः ॥६॥

गुणः सहभावी धर्मो यथा-आत्मनि विज्ञानव्यक्तिशक्त्यादिः ॥ ५-७ ॥

वस्तुषु यः सहभावी धर्मः स गुणः, यथाऽऽत्मनि विज्ञानव्यक्तिः—यत्किञ्चिज्ज्ञानं, विज्ञानशक्तिः—उत्तरज्ञानाकारपरिणामयोग्यता, सुखं यौवनमित्यादयो समकालभाविनो धर्मा गुणशब्दाभिधेयाः ॥ ७ ॥

पर्यायस्तु क्रमभावी यथा 'तत्रैव सुखदुः-
खादिः' ॥ ५-८ ॥

[illegible]दुःखशोकविषादादयो ये धर्मा आत्मनि समकालं
न [illegible] किन्तु क्रमेणैव भवन्ति ते पर्यायशब्दा-
[illegible] ॥८॥

इति [illegible] विभूषिते
[illegible] प्रमाणनयतत्त्वाऽऽ
[illegible] पञ्चमः
परिच्छेदः.

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

अर्हं

अथ षष्ठः परिच्छेदः

यत् प्रमाणेन प्रसाध्यते तदस्य फलम् ॥ ६-१ ॥

प्रमाणेन हि अज्ञाननिवृत्त्यादिकं साध्यतेऽतस्तदेव अस्य-प्रमाणस्य फलमिति भावः ॥१॥

तद् द्विविधमानन्तर्येण पारम्पर्येण च ॥ ६-२ ॥

प्रमाणस्य फलं द्विविधं आनन्तर्येण पारम्पर्येण च अव्यवहितं व्यवहितं चेत्यर्थः ॥ २ ॥

तत्राऽऽनन्तर्येण सर्वप्रमाणानामज्ञाननिवृत्तिः फलम् ॥ ६-३ ॥

सर्वप्रमाणानामव्यवहितफलमज्ञाननिवृत्तिः, सा च स्वपरव्यवसायरूपा, यथा–घटध्वंसः कपालसमुदायात्मकः, तथैवाऽज्ञानस्य निवृत्तिः—ध्वंसोऽपि स्वपरनिश्चयात्मक इति भावः ॥३॥

पारम्पर्येण केवलज्ञानस्य तावत्फलमौदासीन्यम् ॥ ६-४ ॥

उपादानबुद्ध्याऽऽदिना प्रमाणाद्भिन्नेन व्यवहितफलेन हेतोर्व्यभिचार इति न विभावनीयम् ॥ ६-७ ॥

प्रमाणाद्भिन्ने उपादानबुद्ध्यादौ उक्तलक्षणो हेतुर्वर्तते अतो व्यभिचार इति न विभावनीयम् ॥७॥

अत्र हेतुमाहुः—

तस्यैकप्रमातृतादात्म्येन प्रमाणादभेदव्यवस्थितेः ॥ ६-८ ॥

तस्य—उपादानबुद्ध्यादिरूपस्य व्यवहितफलस्य एकप्रमातृतादात्म्येन वर्तमानत्वात् प्रमाणादभिन्नत्वमित्यर्थः। प्रयोगश्च—उपादानबुद्ध्यादिरूपं फलं प्रमाणादभिन्नं, एकप्रमातृतादात्म्यात्, अव्यवहितफलवत् ॥ ८ ॥

एकप्रमातृतादात्म्यमुपपादयन्ति—

प्रमाणतया परिणतस्यैवाऽऽत्मनः फलतया परिणतिप्रतीतेः ॥ ६-९ ॥

यः प्रमाता पूर्वं प्रमाणतया परिणतः स एव फलतया परिणमति, इत्येकप्रमात्रपेक्षया प्रमाणफलयोरभेद इति ॥

[illegible] भिनीते स प्रत्योपायत्वे परित्यजत्यो [illegible] नैति सर्वसंव्यवहारिभिरस्खलितमव [illegible] ॥ ६-१० ॥

[illegible] प्रमाणेन [illegible] निश्चिनोति [illegible] नेति [illegible] [illegible] चोपादानादि [illegible] ॥ १० ॥

[illegible] ॥ ६-११ ॥

[illegible]

प्रमाणफले देवदत्तस्य कुतो न भवेताम्? भेदस्य उभयत्राविशेषाद्, इति एकप्रमातृतादात्म्येन प्रमाणफलयोरव्यवस्थितिरङ्गीकर्तव्येति ॥११॥

अज्ञाननिवृत्तिस्वरूपेण प्रमाणादभिन्नेन साक्षात्फलेन साधनस्याऽनेकान्त इति नाऽऽशङ्कनीयम् ॥ ६-१२ ॥

ननु प्रमाणफलत्वाऽन्यथानुपपत्तेरिति प्रमाणफलयोर्भेदाऽभेदसाधकत्वेनोपन्यस्तो हेतुः प्रमाणात्सर्वथाऽभिन्ने अज्ञाननिवृत्त्याख्येऽव्यवहितफलेऽपि वर्तते अतो व्यभिचारीति बौद्धैर्नाऽऽरेकणीयम् ॥१२॥

कुतः? इत्याहुः—

कथञ्चित्तस्यापि प्रमाणाद्भेदेन व्यवस्थानात् ॥ ६-१३ ॥

अज्ञाननिवृत्तिरूपस्य फलस्यापि प्रमाणात्कथञ्चिद्भिन्नत्वेनावस्थानादित्यर्थः ॥१३॥

तदेवोपपादयन्ति—

साध्यसाधनभावेन प्रमाणफलयोः प्रतीयमानत्वात् ॥ ६-१४ ॥

[illegible]

[illegible] ॥१४॥

[illegible]

[illegible] करणाऽऽख्यं साधनं, स्वपरव्य[illegible] सितौ साधकतमत्वात् ॥ ६-१५ ॥

यत्तु क्रियायां साधकतमं तत् करणाऽऽख्यं साध[illegible] यथा कुठारः, [illegible] प्रमाणं तस्मा[illegible] करणाऽऽख्यं साधनमिति ॥१५॥

स्वपरव्यवसितिक्रियारूपाज्ञाननिवृत्त्याख्यं फलं तु साध्यं, प्रमाणनिष्पाद्यत्वात् ॥ ६-१६

यत् प्रमाणेन निष्पाद्यं तत् साध्यं यथा-उपादानबु[illegible] दिकं, प्रमाणेन निष्पाद्यञ्च स्वपरव्यवसितिक्रियारूपा[illegible] निवृत्त्याख्यं फलं, तस्मात्तत् साध्यमिति ॥१६॥

प्रमातुरपि स्वपरव्यवसितिक्रियायाः कथञ्चिद्भेदः ॥ ६-१७ ॥

न केवलं प्रमाणात् स्वपरव्यवसितिक्रियाया भेदः किन्तु प्रमातुरात्मनोऽपि सकाशाद्भेद इत्यर्थः ॥ १७ ॥

कर्तृ-क्रिययोः साध्य-साधकभावेनोपलम्भात् ॥ ६-१८ ॥

ये साध्यसाधकभावेनोपलभ्येते ते भिन्ने, यथा-देवदत्त-दारुच्छिदिक्रिये, साध्यसाधकभावेनोपलभ्येते च प्रमातृ-स्वपरव्यवसितिलक्षणाक्रिये, तस्मात् कथञ्चिद्भिन्ने इत्यर्थः ॥ ६-१८ ॥

कर्ता हि साधकः, स्वतन्त्रत्[illegible]या तु साध्या, कर्तृनिर्वर्त्यत्वात् ॥ ६-१९ ॥

न च क्रिया क्रियावतः सकाशादभिन्नैव भिन्नैव वा, प्रतिनियतक्रिया-क्रियावद्भावभङ्ग प्रसङ्गात् ॥ ६-२० ॥

[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

[illegible]
[illegible]

[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

काल्पनिकत्वं प्रमाणात् स्वीक्रियते ? अप्रमाणाद्वा ? न तावदप्रमाणात्, तस्य स्वाभिमतसिद्धिं प्रत्यकिञ्चित्करत्वात्। यदि प्रमाणात्, तदपि प्रमाणं काल्पनिकम् ? अकाल्पनिकं वा? यदि काल्पनिकं तर्हि कथं काल्पनिकात्प्रमाणात् प्रमाणफलव्यवहारस्य परमार्थतः काल्पनिकत्वसिद्धिः ? तथा च प्रमाणफलव्यवहारस्य सत्यत्वमेवायातं। यदि अकाल्पनिकं प्रमाणफलग्राहकं प्रमाणं तर्हि 'सर्वोऽपि प्रमाणफलव्यवहारः काल्पनिकः' इति प्रतिज्ञाविरोधः, एकत्र प्रमाणस्याकाल्पनिकत्वस्वीकारात्। तस्मात् प्रमाणफलव्यवहारः परमार्थभूत एवाभ्युपगन्तव्य इति ॥ २१ ॥

ततः पारमार्थिक एव प्रमाणफलव्यवहारः सकलपुरुषार्थसिद्धिहेतुः स्वीकर्तव्यः ॥ ६-२२ ॥

* * * * *

प्रमाणस्य स्वरूपादिचतुष्टयाद्विपरीतं तदाभासम् ॥ ६-२३ ॥

प्रमाणस्य स्वरूप-संख्या-विषय-फललक्षणात् स्वरूपचतुष्टयाद्विपरीतं स्वरूपाऽऽभासं, संख्याऽऽभासं, विषयाऽऽ-

भासं, फलाऽऽभासमिति स्वरूपादिचतुष्टयाऽऽभासमित्यर्थः ॥ २३ ॥

अज्ञानात्मकानात्मप्रकाशक-स्वमात्रावभासक-निर्विकल्पक-समारोपाः प्रमाणस्य स्वरूपाभासाः ॥ ६-२४ ॥

अज्ञानात्मकं च अनात्मप्रकाशकं च स्वमात्रावभासकं च निर्विकल्पकं च समारोपश्चेति पञ्च प्रमाणस्य स्वरूपाऽऽभासा इति ॥ २४ ॥

यथा-सन्निकर्षाद्यस्वसंविदित-परानवभासकज्ञान-दर्शन-विपर्यय-संशयानध्यवसायाः॥६-२५॥

नैयायिकाद्यभिमतं सन्निकर्षादिकम् अज्ञानात्मकस्य दृष्टान्तः । मीमांसकाभिमतमस्वसंविदितज्ञानम् अनात्मप्रकाशकस्य । योगाचाराभिमतं परानवभासकं ज्ञानं स्वमात्रावभासकस्य । सौगताभिमतं दर्शनं निर्विकल्पकस्य । विपर्ययसंशयानध्यवसायास्तु समारोपस्येति । एतेषां सन्निकर्षादीनां स्वरूपं प्रथमपरिच्छेदे प्रदर्शितमिति नेह प्रतन्यते ॥ २५ ॥

प्रतीतसाध्यधर्मविशेषणो यथा—आर्हतान् प्रत्यवधारणवर्जं परेण प्रयुज्यमानः समस्ति जीव इत्यादिः ॥ ६-३९ ॥

जैनान् प्रति 'समस्ति जीवः' इत्यवधारणार्थकैवकाररहितं वाक्यं यदा कश्चित्प्रयुङ्क्ते तदा तद्वचनं सिद्धसाधनापरपर्यायेण प्रतीतसाध्यधर्मविशेषणदोषेण दूषितं भवति, जैनैश्च तावदनेकान्तात्मकं जीवादितत्त्वमङ्गीकृतमेवेति तान्प्रति जीवास्तित्वसाधनं सिद्धसाधनमेवेति भावः ॥३९॥

निराकृतसाध्यधर्मविशेषणःप्रत्यक्षानुमानाऽऽगमलोकस्ववचनादिभिः साध्यधर्मस्य निराकरणादनेकप्रकारः ॥ ६-४० ॥

प्रत्यक्षनिराकृतसाध्यधर्मविशेषण. अनुमाननिराकृतसाध्यधर्मविशेषणः, आगमनिराकृतसाध्यधर्मविशेषणः, लोकनिराकृतसाध्यधर्मविशेषणः, स्ववचननिराकृतसाध्यधर्मविशेषणः, आदिपदात् स्मरणनिराकृतसाध्यधर्मविशेषणः, प्रत्यभिज्ञाननिराकृतसाध्यधर्मविशेषणः, तर्कनिराकृतसाध्यधर्मविशेषणश्चेति निराकृतसाध्यधर्मविशेषणोऽनेकप्रकार इत्यर्थः ॥ ४० ॥

स श्यामः, मैत्रतनयत्वाद् इत्यत्र यावान्मैत्रतनयः स श्याम इति यथा ॥ ६-३६ ॥

'स श्यामः, मैत्रतनयत्वात्' इत्यस्मिन्ननुमाने हेतोः सोपाधिकत्वात् साध्येन श्यामत्वेन सह व्याप्तिर्नास्ति तथापि 'यत्र यत्र मैत्रतनयत्वं तत्र तत्र श्यामत्वम्' इत्याकारकं व्याप्तिज्ञानमुत्पद्यते स तर्काऽऽभास इत्यर्थः ॥३६॥

पक्षाऽऽभासादिसमुत्थं ज्ञानमनुमानाऽऽभासमवगमम ॥ ६-३७ ॥

आदिपदेन हेत्वाभासदृष्टान्ताऽऽभासोपनयाऽऽभासनिगमनाऽऽभासानां संग्रहः । स्पष्टमन्यत् ॥ ३७ ॥

तत्र प्रतीतनिराकृतानभीप्सितसाध्यधर्मविशेषणास्त्रयः पक्षाऽऽभासाः ॥ ६-३८ ॥

[illegible] । प्रतीतनिराकृतानभीप्सितसाध्यधर्मविशेषणाः [illegible] पक्षाऽऽभासा इत्य[illegible] [illegible] साध्यधर्मविशिष्टधर्मिणो [illegible] [illegible] ॥ ३८ ॥

[illegible]

प्रतीतसाध्यधर्मविशेषणो यथा—आर्हतान्प्रत्यवधारणवर्जं परेण प्रयुज्यमानः समस्ति जीव इत्यादिः ॥ ६-३९ ॥

जैनान् प्रति 'समस्ति जीवः' इत्यवधारणार्थकैवकाररहितं वाक्यं यदा कश्चित्प्रयुङ्क्ते तदा तद्वचनं सिद्धसाधनापरपर्यायेण प्रतीतसाध्यधर्मविशेषणदोषेण दूषितं भवति, जैनैश्च तावदनेकान्तात्मकं जीवादितत्त्वमङ्गीकृतमेवेति तान्प्रति जीवास्तित्वसाधनं सिद्धसाधनमेवेति भावः ॥३९॥

निराकृतसाध्यधर्मविशेषणः प्रत्यक्षानुमानाऽऽगमलोकस्ववचनादिभिः साध्यधर्मस्य निराकरणादनेकप्रकारः ॥ ६-४० ॥

प्रत्यक्षनिराकृतसाध्यधर्मविशेषणः, अनुमाननिराकृतसाध्यधर्मविशेषणः, आगमनिराकृतसाध्यधर्मविशेषणः, लोकनिराकृतसाध्यधर्मविशेषणः, स्ववचननिराकृतसाध्यधर्मविशेषणः, आदिपदात् स्मरणनिराकृतसाध्यधर्मविशेषणः, प्रत्यभिज्ञाननिराकृतसाध्यधर्मविशेषणः, तर्कनिराकृतसाध्यधर्मविशेषणश्चेति निराकृतसाध्यधर्मविशेषणोऽष्टप्रकार इत्यर्थः ॥ ४० ॥

प्रत्यक्षनिराकृतसाध्यधर्मविशेषणो यथा-नास्ति भूतविलक्षण आत्मा ॥ ६-४१ ॥

प्रत्यक्षेण निराकृतः साध्यधर्मविशेषणो यस्य स प्रत्यक्षनिराकृतसाध्यधर्मविशेषणः पक्षाभासः, एवमग्रेऽपि ज्ञातव्यम्। स्वसंवेदनप्रत्यक्षेण पृथिव्यादिभूतेभ्यो विलक्षण आत्माऽस्तीति ज्ञायते, अनेन स्वसंवेदनप्रत्यक्षेण 'नास्ति भूतविलक्षण आत्मा' इति चार्वाकस्य प्रतिज्ञा बाधिता भवति, यथा 'वह्निरनुष्णः' इति प्रतिज्ञा बाह्येन्द्रियप्रत्यक्षेण बाधिता भवतीति ॥ ४१ ॥

अनुमाननिराकृतसाध्यधर्मविशेषणो यथा-नास्ति सर्वज्ञो वीतरागो वा ॥ ६-४२ ॥

'नास्ति सर्वज्ञो वीतरागो वा' इति प्रतिज्ञा 'यः क्वचिन्निर्ह्रासाऽतिशयवान् स क्वचित् स्वकारणजनितनिर्मूलक्षयः यथा कनकादिमलः, निर्ह्रासातिशयवती च दोषावरणे' इत्यनुमानबाधिता। अनेनानुमानेन यत्र क्वचन पुरुषधौरेये दोषाऽऽवरणयोः सर्वथा प्रक्षयप्रसिद्धिः स एव सर्वज्ञो वीतरागो वा। एवम् 'अपरिणामी शब्दः' इति प्रति

शब्दः परिणामी कृतकत्वात्' इत्यनुमानेन बाध्यते इति ॥ ४२ ॥

आगमनिराकृतसाध्यधर्मविशेषणो यथा—जैनेन रजनिभोजनं भजनीयम् ॥ ६-४३ ॥

जैनेन रजनिभोजनं भजनीयमिति प्रतिज्ञा—

अत्थं[1] गयम्मि आइच्चे पुरत्था य अणुग्गए ।

आहारमाइयं[2] सव्वं मणसा वि न पत्थए[3] ॥ १ ॥

इति आगमवचनेन बाधिता भवतीत्यर्थः ॥ ४३ ॥

लोकनिराकृतसाध्यधर्मविशेषणो यथा—न पारमार्थिकः प्रमाणप्रमेयव्यवहारः ॥ ६-४४ ॥

'प्रमाणप्रमेयव्यवहारो न पारमार्थिकः' इति सौगतानां प्रतिज्ञा लोकेन लोकप्रतीत्या बाध्यते, लोको हि प्रमाणं

---

१ अस्तं गते आदित्ये पुरस्ताच्चानुद्गते ।
आहारादिकं सर्वं मनसाऽपि न प्रार्थयेत् ॥
(इति संस्कृतच्छाया)

२ "आहारमइअं" इत्यपि पाठो दृश्यते ।

३ दशवैकालिकसूत्रस्याष्टमाध्ययने द्वितीयोद्देशके २८ तमः श्लोकोऽयं २३० पृष्ठे । संशोधकः ।

प्रमेयं च सत्यत्वेनाङ्गीकृत्यैव प्रवर्तते अन्यथा कस्मिन्नपि विषये प्रवृत्तिरेव न स्यात्। इयं लोकप्रतीतिर्न पृथक्प्रमाणत्वेनावधारणीया, अस्याः प्रत्यक्षादिष्वेवान्तर्भावात्, पृथक् निर्देशस्तु शिष्यबुद्धिवैशद्यार्थमेवेति। एवं 'नरशिरःकपालः शुचिः, प्राण्यङ्गत्वात्, शङ्खादिवत्' इत्यादीन्यप्युदाहरणानि द्रष्टव्यानि ॥ ४४ ॥

स्ववचननिराकृतसाध्यधर्मविशेषणो यथा—नास्ति प्रमेयपरिच्छेदकं प्रमाणम् ॥ ६-४५ ॥

'नास्ति प्रमेयपरिच्छेदकं प्रमाणम्' इति यो ब्रूते स 'नेदं वचनं प्रमाणम्' इति मन्येव ब्रूते, अन्यथा तेन मौनेनैव स्थातव्यं, प्रमाणं तु स्ववचनेनैव व्याहन्यते, परार्थप्रत्यायनार्थमेव शब्दप्रयोगः, यदि स्ववचने प्रामाण्यं न, तर्हि तस्य परप्रत्यायनाय शब्दोच्चारणे प्रवृत्तिरेव न स्यात्, प्रवृत्तौ तु स्ववचने प्रामाण्यग्रहणात् स्ववचनेन 'नास्ति प्रमेयपरिच्छेदकं प्रमाणम्' इति प्रतिज्ञा बाधितैव स्यादिति भावः। एवं 'निरन्तरमहं मौनी' इत्याद्यपि द्रष्टव्यम्।

स्मरणनिराकृतसाध्यधर्मविशेषणो यथा—'स सहकार-तरुःफलशून्यः' इति कस्यचित् प्रतिज्ञा, सहकारतरुं यः फलविशिष्टत्वेन स्मरति, तस्य स्मरणेन निराक्रियते । प्रत्यभिज्ञानिराकृतसाध्यधर्मविशेषणो यथा—सदृशेऽपि क्वचन वस्तुनि कश्चनोर्ध्वतासामान्यभ्रान्त्या प्रतिज्ञां कुरुते 'तदेवेदम्' इति तस्येयं प्रतिज्ञा तिर्यक्सामान्यावलम्बिना 'तेन सदृशम्' इति प्रत्यभिज्ञानेन बाध्यते । तर्कनिराकृतसाध्यधर्म-विशेषणो यथा—'यो यस्तत्पुत्रः स स श्याम इति व्याप्तिः समीचीना' इत्ययं पक्षः 'यो जनन्युपभुक्तशाकाद्याहारपरि-णामपूर्वकस्तत्पुत्रः स श्यामः इति व्याप्तिग्राहकेण सम्य-क्तर्केण व्याहन्यते ॥४५॥

अनभीप्सितसाध्यधर्मविशेषणो यथा-स्याद्वा-दिनः शाश्वतिक एव कलशादिरशाश्वतिक एव वेति वदतः ॥ ६-४६ ॥

स्याद्वादिभिस्तावत् पदार्थानां कथञ्चिन्नित्यानित्यत्वमेवा-ङ्गीकृतं तथापि कदाचिदसौ स्याद्वादी सभाक्षोभादिना 'घटो नित्य एव' अथवा 'घटोऽनित्य एव' इति प्रतिज्ञां करोति तदा तस्येयं प्रतिज्ञाऽनभीप्सितसाध्यधर्मविशेषणदोषेण दूषिता-

भवति, स्याद्वादिनो हि सर्वत्र वस्तुनि नित्यत्वैकान्तोऽनित्यत्वैकान्तो वा नाभीप्सितः ॥ ४६ ॥

पक्षाऽऽभासान्निरूप्य हेत्वाभासानाहुः—

असिद्ध-विरुद्धानैकान्तिकास्त्रयो हेत्वाभासाः ॥ ६-४७ ॥

व्याप्त्याश्रयाभावादहेतवोऽपि हेतुवदाभासन्ते इति हेत्वाभासाः—दुष्टहेतव इत्यर्थः, ते चाऽसिद्ध-विरुद्धानैकान्तिकभेदेन त्रिविधाः ॥ ४७ ॥

यस्यान्यथाऽनुपपत्तिः प्रमाणेन न प्रतीयते सोऽसिद्धः ॥ ६-४८ ॥

यस्य हेतोः केनापि प्रमाणेनान्यथाऽनुपपत्तिर्न प्रतीयते सोऽसिद्धः, निश्चितान्यथाऽनुपपत्त्येकलक्षणत्वाद्धेतोः ॥४८॥

स द्विविध उभयासिद्धोऽन्यतरासिद्धश्च ॥ ६-४९ ॥

स हेतुर्द्विविधः। यो वादि-प्रतिवादिसमुदायरूपस्योभयस्यासिद्धः स उभयाऽसिद्धः। यस्त्वन्यतरस्य वादिनः प्रतिवादिनो वाऽसिद्धः सोऽन्यतराऽसिद्ध इत्यर्थः ॥ ४९ ॥

बाधसिद्धेरुदाहरणं तु-'सुखादयोऽचेतनाः, उत्पत्तिमत्त्वात्' इत्यत्र वादिनः सांख्यस्योत्पत्तिमत्त्वमसिद्धं, तन्मते आविर्भावस्यैवाङ्गीकारात् ॥ ५१ ॥

साध्यविपर्ययेणैव यस्यान्यथाऽनुपपत्तिरध्यवसीयते स विरुद्धः ॥ ६-५२ ॥

यस्यान्यथाऽनुपपत्तिः-अविनाभावः साध्यविपर्ययेणैव साध्याभावेनैव निश्चीयते न तु साध्येन, स विरुद्ध इत्यर्थः ॥ ५२ ॥

यथा नित्य एव पुरुषोऽनित्य एव वा, प्रत्यभिज्ञानादिमत्त्वात् ॥ ६-५३ ॥

'पुरुषः नित्य एव प्रत्यभिज्ञानादिमत्त्वात्' [illegible] [illegible] नित्यत्व[illegible] परिणामि [illegible], [illegible] पुरुषस्य [illegible] प्रत्यभिज्ञानं [illegible], [illegible]

[illegible]

[illegible] । [illegible]

[illegible]

[illegible] ।

यस्य हेतोः, अन्यथानुपपत्तिः—साध्येन सहाऽविनाभा सन्दिह्यते—क्वचित्साध्याधिकरणे क्वचित्साध्याऽभावाधिक हेतोर्वर्तनात् सन्देहविषयो भवति सोऽनैकान्तिकः ॥ ५४

स द्वेधा-निर्णीतविपक्षवृत्तिकः सन्दिग्धविपक्षवृत्तिकश्च ॥ ६-५५ ॥

निर्णीता विपक्षे वृत्तिर्यस्यासौ निर्णीतविपक्षवृत्तिकः संदिग्धा विपक्षेवृत्तिर्यस्य स संदिग्धविपक्षवृत्तिकः ।

अयमर्थः—यस्य हेतोर्विपक्षे साध्याऽभावाधिकरणे वृत्ति निश्चीयते स निर्णीतविपक्षवृत्तिकोऽनैकान्तिकः । यस्य विपक्षे वृत्तिः सन्दिह्यते स सन्दिग्धविपक्षवृत्तिकोऽनैकान्ति इति ॥ ५५ ॥

निर्णीतविपक्षवृत्तिको यथा-नित्यः शब्दः, प्रमेयत्वात् ॥ ६-५६ ॥

'शब्दो नित्यः, प्रमेयत्वात्' इत्यस्मिन्ननुमाने प्रमेयत्वहेतोर्विपक्षे नित्यत्वाभावाधिकरणेऽनित्ये घटादौ वृत्तिर्निर्णीयते, अतो भवति सन्देहः किमयं हेतुर्नित्यत्वेन व्याप्तोऽनित्यत्वेनेति ? तथा चाऽविनाभावस्य सन्देहादयं हेतुर्निर्णीतविपक्षवृत्तिकोऽनैकान्तिक इत्यर्थः ॥ ५६ ॥

संदिग्धविपक्षवृत्तिको यथा-विवादपदाऽऽपन्नः पुरुषः सर्वज्ञो न भवति, वक्तृत्वात् ॥६-५७॥

अस्मिन्ननुमाने "वक्तृत्वात्" इति हेतोर्विपक्षे सर्वज्ञे वृत्तिः संदिह्यते, 'किं सर्वज्ञे वक्तृत्वं वर्तते न वा' ? इति । तस्मादयं हेतुः सन्दिग्धविपक्षवृत्तिकोऽनैकान्तिक इति ॥५७॥

अथ दृष्टान्ताऽऽभासान् प्रदर्शयन्ति—

साधर्म्येण दृष्टान्ताऽऽभासो नवप्रकारः ॥६-५८॥

साधर्म्यवैधर्म्यभेदेन दृष्टान्तस्य द्विविधत्वं प्राक्* प्रदर्शितम् । अतस्तदाभासस्यापि साधर्म्यवैधर्म्यभेदेन द्विविधत्वमर्थादायातम् । तत्र साधर्म्येण दृष्टान्ताऽऽभासो नव प्रकार इत्यर्थः ॥ ५८ ॥

साध्यधर्मविकलः, साधनधर्मविकलः, उभयधर्मविकलः, संदिग्धसाध्यधर्मा, † सन्दिग्ध-

* तृतीयपरिच्छेदे ४५ सूत्रे, पृ० ४२ । † अत्र "द्विपदाद् धर्मादन्" ॥ ७—३—१४१ ॥ इति सिद्धहेमचन्द्रशब्दानुशासनसूत्रेणात् समासान्तो न भवत्यतो व्याकरणान्तर [illegible]

साधनधर्मा, सन्दिग्धोभयधर्मा, अनन्वयः, अप्रदर्शितान्वयः, विपरीतान्वयश्चेति ॥६-५९॥

साध्यधर्मविकलादिभेदेन साधर्म्यदृष्टान्ताऽऽभासो नवविध इत्यर्थः ॥ ५६ ॥

तत्राऽपौरुषेयः शब्दः, अमूर्तत्वाद्, दुःखवदिति साध्यधर्मविकलः ॥ ६-६० ॥

अत्र दृष्टान्ते दुःखे अपौरुषेयत्वं नास्ति, पुरुषव्यापारजन्यत्वाद् दुःखस्य । तस्मात् साध्यधर्मेणापौरुषेयत्वेन विकलत्वादयं साध्यधर्मविकलाख्यो दृष्टान्ताऽऽभास इत्यर्थः ॥ ६० ॥

तस्यामेव प्रतिज्ञायां तस्मिन्नेव हेतौ परमाणुवदिति साधनधर्मविकलः ॥ ६-६१ ॥

मर्णापिभि., कर्मधारयपूर्वपदबहुव्रीहिसमासेन साधुत्वात् । यदाहुःकवीश्वरा. श्रीमेघविजयोपाध्यायाश्चन्द्रप्रभायाम्-"स न्दिग्धसाध्यधर्मेत्यादौ तु कर्मधारयपूर्वपदो बहुव्रीहि." अ० ७—३—१८१, पृ० १३२ इति ॥ सन्दिग्धः साध्यो धर्मो यत्र स सन्दिग्धसाध्यधर्मा,। इति तत्सिद्धिः । एवमन्यत्रापि । संशोधकः—मुनिहिमांशुविजय. ।

'शब्दोऽपौरुषेयः, अमूर्तत्वात् परमाणुवत्' इत्यत्र यद्यपि परमाणौ साध्यधर्मोऽपौरुषेयत्वमस्ति तथापि साधनधर्मोऽमूर्तत्वं नास्ति तस्मात् साधनधर्मविकलोऽयं दृष्टान्तः॥६१॥

कलशवदित्युभयधर्मविकलः॥ ६-६२ ॥

'शब्दोऽपौरुषेयः, अमूर्तत्वात् कलशवत्' इत्यत्र दृष्टान्ते कलशे साध्यधर्मस्याऽपौरुषेयत्वस्य साधनधर्मस्याऽमूर्तत्वस्य चाभावात् साध्य-साधनोभयधर्मविकलत्वादुभयधर्मविकलः। कलशस्य पौरुषेयत्वात् मूर्तत्वाच्चेति भावः ॥६२॥

रागादिमानयं, वक्तृत्वाद्, देवदत्तवदिति सन्दिग्धसाध्यधर्मा ॥ ६-६३ ॥

'अयं रागादिमान्, वक्तृत्वात्, देवदत्तवत्' इत्यत्र दृष्टान्ते देवदत्ते रागादयः सन्ति न वा ? इति सन्देहो वर्तते, परचेतोविकाराणामप्रत्यक्षत्वात्, रागाद्यव्यभिचारिलिङ्गाभावादनुमानेनापि ज्ञातुमशक्यत्वाच्च। तस्मात् संदिग्धो रागादिमत्त्वलक्षणः साध्यधर्मो यत्र दृष्टान्तेऽसौ संदिग्धसाध्यधर्मा ॥ ६३ ॥

मरणधर्माऽयं, रागादिमत्त्वात्, मैत्रवदिति सन्दिग्धसाधनधर्मा ॥ ६-६४ ॥

अत्र दृष्टान्ते घटे 'यत्र यत्र कृतकत्वं तत्र तत्रानित्यत्वम्' इत्यन्वयव्याप्तिर्वर्तते तथाऽपि वादिना वचनेन न प्रकाशितेत्यप्रदर्शितान्वयः ॥ ६७ ॥

अनित्यः शब्दः, कृतकत्वात्, यदनित्यं तत् कृतकं, घटवदिति विपरीतान्वयः ॥ ६-६८ ॥

अत्र 'यत् कृतकं तदनित्यम्' इत्यन्वये वक्तव्ये "यदनित्यं तत्कृतकम्" इति विपरीतमुक्तं तस्मादत्र विपरीतान्वयो दृष्टान्ताऽऽभासः।

इदमत्र तात्पर्यं—प्रसिद्धानुवादेन ह्यप्रसिद्धं विधीयते। प्रकृतानुमाने तु कृतकत्वं प्रसिद्धं, हेतुत्वेनोपादानात्। अनित्यत्वं चाप्रसिद्धं साध्यत्वेन निर्देशात्। यदित्यनुवादसर्वनाम्ना प्रसिद्धस्य हेतोरेव निर्देशो युक्तः, नाप्रसिद्धस्य साध्यस्य। वादिना तु यच्छब्देनाऽप्रसिद्धस्य साध्यस्य निर्देशः कृत इति विपरीतान्वयः प्रदर्शितः ॥ ६८ ॥

वैधर्म्येणापि दृष्टान्ताऽऽभासो नवधा ॥ ६-६९ ॥

* * * * *

असिद्धसाध्यव्यतिरेकः, असिद्धसाधनव्या-

-रेकः, असिद्धोभयव्यतिरेकः, संदिग्धसाध्यव्यतिरेकः, संदिग्धसाधनव्यतिरेकः, संदिग्धोभयव्यतिरेकः, अव्यतिरेकः, अप्रदर्शितव्यतिरेकः, विपरीतव्यतिरेकश्च ॥ ६-७० ॥

असिद्धसाध्यव्यतिरेकादिभेदत्त वैधर्म्येणापि दृष्टान्ताऽऽभासो नवप्रकार इत्यर्थः ॥ ७० ॥

तेषु भ्रान्तमनुमानं, प्रमाणत्वात्, यत्पुनर्भ्रान्तं न भवति न तत् प्रमाणं, यथा स्वप्नज्ञानमित्यसिद्धसाध्यव्यतिरेकः, स्वप्नज्ञानादभ्रान्तत्वस्याऽनिवृत्तेः ॥ ६-७१ ॥

अत्रानुमाने वैधर्म्यदृष्टान्तत्वेनोपन्यस्ते स्वप्नज्ञाने साध्यव्यतिरेकस्य भ्रान्तत्वाभावस्यासिद्धत्वाद् असिद्धसाध्यव्यतिरेकोऽयं दृष्टान्ताऽऽभास इत्यर्थः ॥ ७१ ॥

निर्विकल्पकं प्रत्यक्षं, प्रमाणत्वाद्, यत्तु सविकल्पकं न तत्प्रमाणं, यथा लैङ्गिकमित्यसिद्ध-

साधनव्यतिरेकः, लैङ्गिकात् प्रमाणत्वस्याऽनिवृत्तेः ॥ ६-७२ ॥

अत्र लैङ्गिकमिति वैधर्म्यदृष्टान्तत्वेनाभिमतं, तत्र साधनव्यतिरेकस्य प्रमाणाऽभावस्याऽसिद्धत्वादसिद्धसाधनव्यतिरेक इति भावः ॥ ७२ ॥

नित्याऽनित्यः शब्दः, सत्त्वात्, यस्तु न नित्याऽनित्यः स न सन्, तद्यथा स्तम्भ इत्यसिद्धोभयव्यतिरेकः, स्तम्भान्नित्याऽनित्यत्वस्य सत्त्वस्य चाऽव्यावृत्तेः ॥ ६-७३ ॥

अत्र वैधर्म्यदृष्टान्तत्वेनाभिमते स्तम्भे साध्यव्यतिरेकस्य नित्यानित्यत्वाऽभावस्य साधनव्यतिरेकस्य सत्त्वाऽभावस्य चाभावादसिद्धोभयव्यतिरेक इत्यर्थः ॥ ७३ ॥

असर्वज्ञोऽनाप्तो वा कपिलः, अक्षणिकैकान्तवादित्वात्, यः सर्वज्ञ आप्तो वा स क्षणिकैकान्तवादी, यथा सुगत इति संदिग्धसाध्य-

१ [illegible]

तिरेकः सुगतेऽसर्वज्ञतानाप्तत्वयोः साध्यधर्मयोर्व्यावृत्तेः सन्देहात् ॥ ६—७४ ॥

अत्र साध्यमसर्वज्ञत्वमनाप्तत्वं वा, तद्व्यतिरेकस्य सर्वज्ञत्वस्याऽऽप्तत्वस्य वा दृष्टान्ते सुगते संदिग्धत्वात् संदिग्धसाध्यव्यतिरेकदृष्टान्ताऽऽभास इत्यर्थः ॥ ७४ ॥

अनादेयवचनः कश्चिद्विवक्षितः पुरुषः, रागादिमत्त्वात्, यः पुनरादेयवचनः स वीतरागः, तद्यथा शौद्धोदनिरिति संदिग्धसाधनव्यतिरेकः, शौद्धोदनौ रागादिमत्त्वस्य निवृत्तेः संशयात् ॥ ६—७५ ॥

अत्रानुमाने साधनं रागादिमत्त्वं, तद्व्यतिरेकस्य रागादिमत्त्वाभावस्य दृष्टान्ते शौद्धोदनौ संदिग्धत्वात् संदिग्धसाधनव्यतिरेक इति ॥ ७५ ॥

न वीतरागः कपिलः, करुणाऽऽस्पदेष्वपि परमकृपयाऽनर्पितनिजपिशितशकलत्वात्, यस्तु

अथोपनयनिगमनाऽऽभासौ प्रदर्शयन्ति—

उक्तलक्षणोल्लङ्घनेनोपनय-निगमनयोर्वचने तदाभासौ ॥ ६-८० ॥

"हेतोः साध्यधर्मिण्युपसंहरणमुपनयः" [॥ ३ ४९ ॥ पृ० ५३] इति उपनयस्य लक्षणम्। "साध्यधर्मस्य पुनर्निगमनम्[॥३-५१॥ पृ० ५४] इति निगमनस्य च लक्षणं पूर्वमुक्तं तदुल्लंघनेन वचने-तद्वैपरीत्येन कथने तदाभासौ-उपनयाऽऽभास–निगमनाऽऽभासौ भवत इति ॥ ८० ॥

यथा-परिणामी शब्दः, कृतकत्वाद् यः कृतकः स परिणामी, यथा कुम्भ इत्यत्र परिणामी च शब्द इति, कृतकश्च कुम्भ इति च ॥ ६-८१ ॥

अत्रानुमाने, 'कृतकश्च शब्दः' इत्याकारकं साध्यधर्मिणि साधनधर्मस्योपसंहरणलक्षणं उपनयवाक्यं प्रयोक्तव्यमासीत् " किन्तु वादिना परिणामी च शब्दः " इति साध्यधर्मिणि साध्यधर्मस्य, " कृतकश्च कुम्भः " इति दृष्टान्तधर्मिणि साधनधर्मस्य चोपसंहरण कृतमिति उपनयाऽऽभास इत्यर्थः ॥ ८१ ॥

तस्मिन्नेव प्रयोगे तस्मात् कृतकः शब्द इति, तस्मात् परिणामी कुम्भ इति च ॥ ६-८२ ॥

तस्मिन्नेव प्रयोगे–' शब्दः परिणामी, कृतकत्वात्, कुम्भवत् ' इति प्रयोगे 'तस्मात् परिणामी शब्दः ' इत्याकारं साध्यधर्मस्य साध्यधर्मिणि उपसंहरणलक्षणं निगमनवाक्यं प्रयोक्तव्यमासीत्, तथापि वादिना "तस्मात् कृतकः शब्दः" इति साधनधर्मस्य साध्यधर्मिणि, "तस्मात् परिणामी कुम्भः" इति साध्यधर्मस्य दृष्टान्तधर्मिणि उपसंहरणं कृतमिति निगमनाऽऽभासमित्यर्थः ॥ ८२ ॥

अनाप्तवचनप्रभवं ज्ञानमागमाभासम्॥६-८३॥

"अभिधेयं वस्तु यथाऽवस्थितं यो जानीते यथाज्ञानं चाभिधत्ते स आप्तः" [॥ ४-४ ॥ पृ० ७७] तद्विपरीतो योऽभिधेयं वस्तु यथाऽवस्थितं न जानीते यथाज्ञानं च नाभिधत्ते सोऽनाप्तः, तद्वचनसमुत्थं ज्ञानमागमाऽऽभासं ज्ञातव्यम् ॥ ८३ ॥

यथा-मेकलकन्यकायाः कूले तालहिन्तालयोर्मूले सुलभाः पिण्डखर्जूराः सन्ति त्वरितं

विषयाभासं प्रकाशयन्ति—

सामान्यमेव, विशेष एव, तद् द्वयं वा स्वतन्त्रमित्यादिस्तस्य विषयाऽऽभासः ॥ ६-८६ ॥

प्रमाणस्य विषयः सामान्यविशेषाऽऽत्मकं वस्तु इति पूर्वमुक्तं, [सू० ॥५-१॥, पृ० १०२] तद्वैपरीत्येन 'सामान्यमेव प्रमाणस्य विषयः, इति सत्ताऽद्वैतवादिनः, 'विशेष एव' इति सौगताः । तदुभयं च स्वतन्त्रम्' इति नैयायिका यद् स्वीकुर्वन्ति स विषयाऽऽभास इत्यर्थः ॥ ८६ ॥

अभिन्नमेव भिन्नमेव वा प्रमाणात् फलं, तस्य तदाभासम् ॥ ६-८७ ॥

शपथे भाषा—सम्पदो काल संविदो । सिद्धान्ताऽऽचार—संकेत—नियमावसरेषु च ॥ [तृतीयकाण्डे] इति हैमानेकार्थकः । प्रत्यक्षत. परोक्षतश्चेत्यर्थः । प्रत्यक्षपरोक्षातिरिक्तप्रमाण खण्डनं तु स्याद्वादरत्नाकरतो (परि० २–१) रत्नाकरावतारिकातश्च विज्ञेयम् । संशोधकः—मुनिहिमांशुविजयः ।

१ शाङ्करप्रमुखाः ।

अभिन्नमेव प्रमाणात् फलं बौद्धानां । भिन्नमेव नैयायिकादीनां । तस्य प्रमाणस्य फलाऽऽभासमिति । वस्तुतः प्रमाणात् फलस्य भिन्नाभिन्नत्वं प्रागुपदर्शितम् ॥ ८७ ॥

इति श्रीबालबोधिन्याख्यया टिप्पण्या विभूषिते श्रीवादिदेवसूरिसंदृब्धे प्रमाणनयतत्त्वाऽऽलोके फलस्वरूपप्रमाणाद्याभासनिर्णायको नाम षष्ठः परिच्छेदः



स व्याससमासाभ्यां द्विप्रकारः ॥ ७-३ ॥

स नयो-व्यास-समासाभ्यां-विस्तर-संक्षेपाभ्यां द्विप्रकारः-द्विभेदः ॥ ३ ॥

व्यासतो ऽनेकविकल्पः ॥ ७-४ ॥

अनन्तांऽशात्मके वस्तुनि एकांऽशगोचरः प्रतिपत्तुरभिप्रायविशेषो नय इति प्राक् प्रदर्शितम् । ततश्चानन्तांशात्मके वस्तुनि एकैकांशपर्यवसायिनो यावन्तः प्रतिपत्तृणामभिप्रायविशेषास्तावन्तो नया इति व्यासतोऽनेकप्रकार इत्यर्थः ॥४॥

चार्यपादा नयाऽऽभासादीनां (दुर्नयादीनां) लक्षणान्येमवमाख्यातवन्त —

सदेव, सत, स्यात्सत. इति त्रिधार्थो
मीयेत दुर्नीति-नय-प्रमाणैः । ......

—अन्ययोगव्यव० कारिका २८ ८

१ जावइआ वयणपहा तावइआ चेव हुंति नयवाया । (यावन्तो वचनपथास्तावन्तश्चैव भवन्ति नयवादाः) इत्यार्षम् । दुःषमारप्रतिमल्लैः श्रीमल्लवादिसूरिभिः श्रीनयचक्रवालग्रन्थे [illegible] नयप्रकारा प्रकल्पिता अतस्ततो विशेषजिज्ञासुभिः [illegible] । स च ग्रन्थो मुद्र्यमाणः आस्ते । [illegible] ।

समासतस्तु द्विभेदो द्रव्यार्थिकः पर्यायार्थिकश्च ॥ ७-५ ॥

संक्षेपेण तु द्विप्रकारः। द्रव्यार्थिकः—[1]द्रव्यार्थोऽस्ति यस्य विषयत्वेन स द्रव्यार्थिकः। पर्यायार्थिकः—पर्यायरूपोऽर्थः, पर्यायार्थः, पर्यायार्थोऽस्ति यस्य विषयत्वेन स पर्यायार्थिकः ॥ ५ ॥

आद्यो नैगम-संग्रह-व्यवहारभेदात् त्रेधा॥७-६॥

आद्यो द्रव्यार्थिकः। नैगमादिभेदात् त्रिविधः ॥ ६ ॥

धर्मयोर्धर्मिणोर्धर्मधर्मिणोश्च प्रधानोपसर्जनभावेन यद्विवक्षणं स नैकगमो नैगमः ॥७-७॥

धर्मयोः—पर्याययोः, धर्मिणोः—द्रव्ययोः, धर्मधर्मिणोः—द्रव्यपर्याययोश्च प्रधानगौणभावेन विवक्षणं स नैगमः। नैके गमाः-बोधमार्गा यस्यासौ नैगम इति ॥ ७ ॥

१ द्रवति, अदुद्रुवत्, द्रोष्यति तांस्तान् पार्यायानिति द्रव्यम् सामान्यगोचरो द्रव्यार्थिक, विशेषगोचरश्च, पर्यायार्थिको नातिरहस्यम्। संशोधकः।

सच्चैतन्यमात्मनीति धर्मयोः ॥ ७–८ ॥

प्रधानोपसर्जनभावेन विवक्षाविषयीकरणस्य च धर्मद्वये योजनीयम्। तत्रादिभेदस्य 'सच्चैतन्यमात्मनि वर्तते' इति वाक्ये चैतन्याख्यधर्मस्य प्राधान्येन विवक्षा, तस्य विशेष्यत्वात्, सत्त्वाख्यधर्मस्य तु गौणत्वेन, तस्य चैतन्यविशेषणत्वादिति धर्मद्वयविषयको नैगमस्य प्रथमो भेदः ॥८॥

वस्तु पर्यायवद्द्रव्यमिति धर्मिणोः ॥ ७–९ ॥

अत्र 'पर्यायवद् द्रव्यं वस्तु च' इति धर्मिद्वयम्। 'पर्यायवद्द्रव्यं वस्तु वर्तते' इति विवक्षायां पर्यायवद्द्रव्याख्यस्य धर्मिणो विशेष्यत्वेनोपात्तत्वात् प्राधान्यम्, वस्त्वाख्यस्य तु धर्मिणो विशेषणत्वेन गौणत्वम्। अथवा किं वस्तु? 'पर्यायवद्द्रव्यमिति विवक्षायां वस्त्वाख्यस्य धर्मिणो विशेष्यत्वात् प्राधान्यं, पर्यायवद्द्रव्याख्यस्य तु धर्मिणो विशेषणत्वेन गौणत्वमिति धर्मिद्वयविषयको नैगमस्य द्वितीयो भेदः ॥९॥

क्षणमेकं सुखी विषयासक्तजीव इति धर्मधर्मिणोः ॥ ७–१० ॥

अत्र विषयाऽऽसक्तजीवस्य प्राधान्यं, विशेष्यत्वेनोपात्तत्वात्, सुखरूपस्य धर्मस्य तु अप्राधान्यं, विशेषणत्वेन नि-

[illegible]ः । इति धर्मधर्मिद्वयाऽऽलम्बनोऽयं नैगमस्य तृ[illegible] भेदः ॥ १० ॥

धर्मद्वयादीनामैकान्तिकपार्थक्याभिसन्धिर्नैगमाभासः ॥ ७—११ ॥

आदिशब्देन धर्मिद्वय धर्मधर्मिद्वययोः संग्रहः । तथा च द्वयोर्धर्मयोः, द्वयोर्धर्मिणोः, धर्मधर्मिणोर्वा विषये ऐकान्तिकपार्थक्याभिप्रायो यः स नैगमाभास इत्यर्थः ॥ ११ ॥

यथा—आत्मनि सत्त्वचैतन्ये परस्परमत्यन्तं पृथग्भूते इत्यादिः ॥ ७—१२ ॥

[illegible] परस्परमत्यन्तं पृथग्भूते [illegible] । पार्थक्यमैकान्तिकं यद् दृष्टान्तकं बोध[illegible] [illegible] स नैगमाभास इत्यर्थः ॥ १२ ॥

सामान्यमात्रग्राही परामर्शः संग्रहः ॥ ७-१३ ॥

[illegible] मात्रग्राही — [illegible] [illegible] संग्रहः । [illegible] [illegible] इति व्युत्पत्तेः ॥ १३ ॥

अयमुभयविकल्पः परोऽपरश्च ॥ ७—१४ ॥

अयं संग्रहाख्यो नयः परसंग्रहापरसंग्रहभेदेन द्विभेद इत्यर्थः ॥ १४ ॥

अशेषविशेषेष्वौदासीन्यं भजमानः शुद्धद्रव्यं सन्मात्रमभिमन्यमानः परसंग्रहः ॥७–१५॥

सामान्यं द्विविधं परसामान्यमपरसामान्यं च । तत्र शुद्धद्रव्यापरपर्यायं सत्ताऽऽख्यं परसामान्यम् । द्रव्यत्वपृथिवीत्वादिकमपरसामान्यम् । तत्र शुद्धद्रव्यं सन्मात्रमभिमन्यमानः समस्त विशेषेषु औदासीन्यं भजमानो योऽभिप्रायविशेषः स परसंग्रहाऽऽख्यो नयो बोद्धव्यः ॥ १५ ॥

विश्वमेकं सदविशेषादिति यथा ॥ ७–१६ ॥

विश्वं–जगत्, एकम्–एकरसं, सदविशेषात्–' सत् ' इत्याकारकज्ञानाभिधानाभ्यामविशेषरूपेण ज्ञायमानत्वात्,

---

१ जैनसिद्धान्ते द्रव्यपर्याययोरात्यन्तिको भेदो निषिद्धः, तथा चांकितवन्तः सन्मतितर्के प्रचण्डतार्किकचक्रचक्रवर्तिनः तत्रभवन्त श्रीसिद्धसेनदिवाकरपादाः—

"दव्वं पज्जवविउअं दव्वविउत्ता य पज्जवा णत्थि ।
(द्रव्यं पर्यवविमुतं द्रव्यवियुक्ताश्च पर्यवा न सन्ति" । १-१२
संशोधक –मुनिहिमांशुविजयः ।

धर्माधर्माऽऽकाश-काल-पुद्गल-जीवद्रव्याणामै-
क्यं द्रव्यत्वाऽभेदादित्यादिर्यथा ॥ ७-२० ॥

धर्माधर्मादीनामैक्यं, द्रव्यत्वाऽभेदात्—'द्रव्यं द्रव्यम्' इत्यभिन्नज्ञानाभिधानलक्षणलिङ्गानुमितद्रव्यत्वाऽभेदादित्यर्थः। आदिपदेन चेतनाचेतनपर्यायाणामेकत्वं, पर्यायत्वाऽभेदादिति पर्यायाऽभेदसाधकमनुमानमपि बोध्यम् ॥२०॥

द्रव्यत्वादिकं प्रतिजानानस्तद्विशेषान्निह्नुवा-
नस्तदाभासः ॥ ७-२१ ॥

द्रव्यत्वादिसामान्यमङ्गीकृत्य तद्विशेषान् धर्माधर्मादीन् प्रतिक्षिपन्नभिप्रायविशेषस्तदाभासः— अपरसंग्रहाऽऽभास इत्यर्थः ॥ २१ ॥

यथा द्रव्यत्वमेव तत्त्वं, ततोऽर्थान्तरभूता-
द्रव्याणामनुपलब्धेरित्यादिः ॥ ७-२२ ॥

ततः—द्रव्यत्वसकाशात्, अर्थान्तरभूतानां—धर्माऽऽकाशादीनाम् ॥ २२ ॥

१ धर्मास्तिकायाऽधर्मास्तिकायाख्यं गतिस्थिति द्रव्यद्वयम्। संशोधकः।

योऽभिप्रायविशेषो द्रव्यपर्यायविभागमपारमार्थिकं काल्पनिकं मन्यते स व्यवहाराऽऽभासः ॥ २५ ॥

यथा—[1]चार्वाकदर्शनम् ॥ ७-२६ ॥

चार्वाको हि वस्तुनो द्रव्यपर्यायात्मकत्वं नाङ्गीकरोति, किन्तु आपाततः प्रतीयमानं [2]भूतचतुष्टयात्मकं घटपटादिरूपं पदार्थजातं पारमार्थिकं मन्यते, तदतिरिक्तं द्रव्यपर्यायविभागं काल्पनिकमिति । तस्मात् चार्वाकदर्शनं व्यवहाराऽऽभासमिति भावः ॥ २६ ॥

द्रव्यार्थिकं भेदाऽभिधाय पर्यायार्थिकं प्रपञ्चयन्ति —

पर्यायार्थिकश्चतुर्धा—ऋजुसूत्रः शब्दः समभिरूढ एवंभूतश्च ॥ ७-२७ ॥

* * * *

ऋजु—वर्तमानक्षणस्थायि पर्यायमात्रं प्राधान्यतः सूत्रयन्नभिप्राय ऋजुसूत्रः ॥ ७-२८ ॥

ऋजु—अतीतानागतकालक्षणलक्षणकौटिल्यवैकल्यात् सरलम् । अयं भावः—योऽभिप्रायविशेषो वर्तमानक्षणस्थि-

---

१ बृहस्पतिप्रवर्तितं परलोकात्मपुण्यपापमोक्षनिषेधकं नास्तिकं मतम् ॥

२ पृथ्व्यप्तेजोवायव इति भूतचतुष्टयम् । संशोधकः

कालादिभेदेन ध्वनेरर्थभेदं प्रतिपद्यमानः शब्दः ॥ ७-३२ ॥

कालादिभेदेन—काल-कारक-लिङ्ग-संख्या-पुरुषोपसर्गभेदेन, ध्वनेः शब्दस्य अर्थभेदं प्रतिपद्यमानोऽभिप्रायविशेषः शब्दनयः ॥ ३२ ॥

यथा—बभूव भवति भविष्यति सुमेरुरित्यादिः ॥ ७-३३ ॥

यद्यपि सुमेरोर्द्रव्यरूपतयाऽभिन्नत्वात् पर्यायरूपतया च भिन्नत्वाद् भिन्नाभिन्नत्वं वर्तते, तथाऽपि शब्दनयो विद्यमानमपि कनकाचलस्य द्रव्यरूपतयाऽभेदमुपेक्ष्य केवलं भूतवर्तमानभाविष्यल्लक्षणकालत्रयभेदाद् भेदमेवावलम्बते। आदिपदेन 'करोति क्रियते कुम्भः' इति कारकभेदे। 'तटस्तटी तटम्' इति लिङ्गभेदे। 'दाराः कलत्रम्' इति संख्याभेदे 'एहि मन्ये रथेन यास्यति, नहि यास्यसि, यातस्ते पिता' इति पुरुषभेदे। 'सन्तिष्ठते, उपतिष्ठते' इत्युपसर्गभेदेऽप्यर्थस्य भिन्नत्वं स्वीकरोति ॥ ३३ ॥

तद्भेदेन तस्य तमेव समर्थयमानस्तदाभासः ॥ ७-३४ ॥

पर्यायशब्देषु—इन्द्रपुरन्दरादिशब्देषु, निरुक्तिभेदेन—निर्वचनभेदेन, भिन्नमर्थं समभिरोहन्—अभ्युपगच्छन् समभिरूढः ॥ ३६ ॥

इन्दनादिन्द्रः शकनाच्छक्रः पूर्दारणात्पुरन्दर इत्यादिषु यथा ॥ ७-३७ ॥

अयमर्थः—यद्यपि इन्द्रशक्रादयः शब्दा इन्द्रत्वशक्रत्वादिपर्यायविशिष्टस्यार्थस्य वाचकाः, न केवलं पर्यायस्य, तथापि समभिरूढनयवादी गौणत्वाद् द्रव्यवाचकत्वमुपेक्ष्य प्रधानत्वात् पर्यायवाचकत्वमेवाङ्गीकुर्वन् 'इन्द्रादयः शब्दाः प्रतिपर्यायबोधकत्वाद्, भिन्नभिन्नार्थवाचकाः' इति मन्यते। शब्दनयो हि नानापर्यायभेदेप्यर्थाऽभेदमेवाभिप्रैति, समभिरूढस्तु पर्यायभेदे अर्थभेदं प्रतिपद्यते इति विशेषः ॥ ३७ ॥

पर्यायध्वनीनामभिधेयनानात्वमेव कक्षीकुर्वाणस्तदाभासः ॥ ७-३८ ॥

यः पर्यायशब्दानामभिधेयनानात्वमेवाभिप्रैति एकार्थाभिधेयत्वं पुनरुपेक्ष्य सर्वथा तिरस्कुरुते स तदाभासः समभिरूढाऽऽभासः ॥ ३८ ॥

१ "इदु परमैश्वर्ये, शक्लृ शक्तौ" इमधातुपाठः।

क्रियाऽनाविष्टं वस्तु शब्दवाच्यतया प्रतिक्षिपंस्तु तदाभासः ॥ ७-४२ ॥

यः शब्दानां क्रियाऽऽविष्टमेवार्थं वाच्यत्वेनाभ्युपगच्छति क्रियाऽनाविष्टं तु सर्वथा निराकरोति स एवम्भूतनयाऽऽभासः ॥ ४२ ॥

यथा—विशिष्टचेष्टाशून्यं घटाख्यं वस्तु न घटशब्दवाच्यं, घटशब्दप्रवृत्तिनिमित्तभूतक्रियाशून्यत्वात्, पटवदित्यादिः ॥ ७—४३ ॥

अयमस्याशयः—चेष्टार्थकाद् घटधातोर्निष्पन्नत्वाद् घटशब्दस्य चेष्टाविरहितो घटरूपोऽर्थो वाच्यो न भवितुमर्हति, घटशब्दप्रवृत्तौ निमित्तभूता या चेष्टाऽऽख्या क्रिया तच्छून्यत्वात्, पटवत्। यथा-पटो घटीयचेष्टाशून्यत्वाद् घटशब्दवाच्यो न भवति । तथैव चेष्टाशून्यो घटोऽपि घटपदवाच्यो न भवतीति ॥ ४३ ॥

...मकोपटीका। १ "घटिष् चेष्टायाम्" इतिहैमधातुपाठः
...शोधक।

एतेषु चत्वारः प्रथमे, अर्थनिरूपणप्रवणत्वादर्थनयाः ॥ ७–४४ ॥

एतेषु नैगमादिषु सप्तसु नयेषु । प्रथमे-आद्याः ॥ ४४ ॥

शेषास्तु त्रयः शब्दवाच्यार्थगोचरतया शब्दनयाः ॥ ७-४५ ॥

* * * * *

पूर्वः पूर्वो नयः प्रचुरगोचरः, परः परस्तु परिमितविषयः ॥ ७-४६ ॥

प्रचुरगोचरः—अधिकविषयावगाही ॥ ४६ ॥

सन्मात्रगोचरात् संग्रहात् नैगमो भावाभावभूमिकत्वाद् भूमविषयः ॥ ७-४७ ॥

संग्रहनयो हि सन्मात्रविषयत्वाद्भावावगाह्येव, नैगमस्तु भावाभावविषयत्वादुभयावगाहीति बहुविषयः ॥ ४७ ॥

सद्विशेषप्रकाशकाद् व्यवहारतः संग्रहः समस्तसत्समूहोपदर्शकत्वाद् बहुविषयः ॥ ७-४८

व्यवहारो हि कतिपयान् सत्त्वविशिष्टान् पदार्थान् प्रकाशयतीत्यल्पविषयः, संग्रहस्तु समस्तं सद्विशिष्टं वस्तु प्रकाशयतीति भूमविषयः ॥ ४८ ॥

वर्तमानविषयादृजुसूत्राद् व्यवहारस्त्रिकालविषयावलम्बित्वादनल्पार्थः ॥ ७-४९ ॥

ऋजुसूत्रो वर्तमानक्षणस्थायिनः पदार्थान् प्रकाशयतीत्यल्पविषयः, व्यवहारस्तु कालत्रयवर्तिपदार्थजातमवलम्बत इति बहुविषयः ॥ ४९ ॥

कालादिभेदेन भिन्नार्थोपदर्शिनः शब्दादृजुसूत्रस्तद्विपरीतवेदकत्वान्महार्थः॥७-५०॥

शब्दनयो हि कालादिभेदेन पदार्थभेदमङ्गीकरोतीत्यल्पविषयः, ऋजुसूत्रस्तु कालादिभेदेऽप्यभिन्नमर्थं प्रदर्शयतीत्यनल्पार्थः ॥ ५० ॥

प्रतिपर्यायशब्दमर्थभेदमभीप्सतः समभिरूढाच्छब्दस्तद्विपर्ययानुयायित्वात् प्रभूतविषयः ॥ ७-५१ ॥

पर्यायशब्दानां व्युत्पत्तिभेदेन भिन्नार्थतामभ्युपगच्छतीति समभिरूढोऽल्पविषयः, शब्दनयस्तु पर्यायशब्दानां व्युत्पत्तिभेदेनाप्यभिन्नार्थतामङ्गीकरोतीति बहुविषयः ॥५१॥

प्रतिक्रियं विभिन्नमर्थं प्रतिजानानादेवंभूतात् समभिरूढस्तदन्यथार्थस्थापकत्वाद् महागोचरः ॥ ७-५२ ॥

क्रियाभेदेनार्थभेदमभ्युपगच्छत एवंभूतात् क्रियाभेदेऽप्यर्थाऽभेदं प्रतिपादयन् समभिरूढोऽनल्पविषयः ॥ ५२ ॥

नयवाक्यमपि स्वविषये प्रवर्त्तमानं विधिप्रतिषेधाभ्यां सप्तभङ्गीमनुव्रजति ॥ ७-५३ ॥

---

१ नयसप्तभङ्ग्याः कीदृशी स्थापनापद्धतिः? कीदृशश्च वचनप्रकार ? इति नयविधानविद्. सुधियो यदि स्पष्टं लिखेयुस्तदा नयतात्पर्यजिज्ञासूनां महानुपकारो भवेत। कृपया यद्निरीक्ष्यमाणोऽपि न कुत्राऽपि संशयच्छेदकारिणी स्फुटताऽस्मिन् विषये दृष्टाऽस्ति। आधुनिका विशिष्टविद्वांस प्रार्थ्यन्ते मया यत्ते नयसप्तभङ्गीवचनविधिं स्पष्टतया प्रकाशयेयुः। "स्यात्" "एव" इत्यनयोः प्रयोगो नयसप्तभङ्ग्यां विधेयो न वा? विधेयश्चेत् को विशेषस्तर्हि प्रमाणनयसप्तभङ्गीवचनप्रकारयोः? न चेद् विधेयस्तदा कथं पुनर्न्या? कस्माद्वा प्रमाणात्? इत्यादीनि शङ्कास्थानान्यवगन्तव्यानि समाधित्सुभिर्विद्भिः। सं०

यथा-प्रमाणवाक्यं विधिप्रतिषेधाभ्यां प्रवर्तमानं सप्तभङ्गीमनुगच्छति, तथैव नयवाक्यमपि स्वविषये—स्वप्रतिपाद्ये प्रवर्तमानं विधिप्रतिषेधाभ्यां—परस्परविभिन्नार्थनययुग्मसमुत्थविधिनिषेधाभ्यां कृत्वा सप्तभङ्गीत्वमनुगच्छति॥५३॥

प्रमाणवदस्य फलं व्यवस्थापनीयम्॥७-५४॥

अयमर्थः—यथा प्रमाणात् प्रमाणफलं भिन्नाऽभिन्नं, तथैव नयान्नयफलमपि भिन्नाऽभिन्नमेव। यथा प्रमाणस्याऽऽनन्तर्येण फलं वस्त्वज्ञाननिवृत्तिः, तथैव नयस्यापि वस्त्वंशाज्ञाननिवृत्तिः फलं। यथा प्रमाणस्य पारम्पर्येण हानोपादानोपेक्षाबुद्धयः फलं, तथा नयस्यापि वस्त्वंशविषयकहानोपादानोपेक्षाबुद्धयः फलमिति प्रमाणवन्नयस्यापि फलं व्यवस्थापनीयम्॥ ५४ ॥

प्रमाता प्रत्यक्षादिप्रसिद्ध आत्मा ॥ ७-५५॥

'प्रत्यक्षादि' इत्यत्राऽऽदिपदेन अनुमानादीनां संग्रहः। तत्र प्रत्यक्षेण तावद् 'अहं सुखी' 'अहं दुःखी' इत्यादिप्रतीत्या सुखाद्याधारतयाऽहंप्रत्ययगोचरः शरीरादिविलक्षण आत्मा सिध्यति। अनुमानेन यथा—चैतन्यं तन्वादिविलक्षणाऽऽश्रयाधीनम्, तत्र (शरीरादिषु) बाधकोपपत्तौ सत्यां कार्यत्वात्

वादिनां सांख्यादीनां तिरस्कारः। "कर्त्ता साक्षाद्भोक्ता" इतिविशेषणद्वयने कापिलमतं पराकृतम्। "स्वदेहपरिमाणः" इत्यनेन व्यापकाऽऽत्मवादिनां नैयायिकादीनां प्रतिक्षेपः। "प्रतिक्षेत्रं भिन्नः" इत्यनेनैकाऽऽत्मवादिनामद्वैतवेदान्तिनां खण्डनम्। "पौद्गलिकादृष्टवांश्चायम्" इत्यनेनादृष्टस्याऽपौद्गलिकत्वमभ्युपगच्छतां नैयायिकादीनां निरासः ॥ ५६ ॥

तस्योपात्तपुंस्त्रीशरीरस्य सम्यग्ज्ञानक्रियाभ्यां कृत्स्नकर्मक्षयस्वरूपा सिद्धिः ॥ ७-५७ ॥

तस्य-निर्दिष्टस्वरूपस्याऽऽत्मनः, उपात्तपुंस्त्रीशरीरस्य-गृहीतपुरुषस्त्रीशरीरस्य। इदं विशेषणं स्त्रीनिर्वाणद्वेषिणां दिगम्बराणां मतमस्यसितुं, नपुंसकस्य मोक्षाभावज्ञापनार्थं च। "सम्यग्ज्ञान-क्रियाभ्याम्" इतिद्वन्द्वेन सम्यग्ज्ञानक्रिययोः समुचित्य कारणत्वं, न प्रत्येकस्येति प्रदर्शितम्। सम्यग्ज्ञानपदेनैव सम्यग्दर्शनस्यापि प्राप्तत्वात् पृथक्त्वेन न निदर्शितम्। ज्ञानक्रिययोः सम्यक्त्वविशेषणप्रदानेन मिथ्याज्ञानपूर्विकायाः कन्दमूलादिभक्षणरूपाया वा क्रियाया मोक्षकारण-

१ सांख्यमतम्।

अर्हं

अथाऽष्टमः परिच्छेदः

विरुद्धयोर्धर्मयोरेकधर्मव्यवच्छेदेन स्वीकृततदन्यधर्मव्यवस्थापनार्थं साधनदूषणवचनं वादः ॥ ८-१ ॥

एकाधिकरणैककालयोर्विरुद्धयोर्धर्मयोर्मध्यादेकधर्मव्यवच्छेदेन, एकस्य—कथञ्चिन्नित्यत्वस्य एकान्तनित्यत्वस्य वा धर्मस्य, व्यवच्छेदेन-निराकरणेन, स्वीकृततदन्यधर्मस्य कथञ्चिन्नित्यत्वस्य सर्वथानित्यत्वस्य वा व्यवस्थापनार्थं, साधनदूषणवचनं—स्वपक्षस्य साधनवचनं, परपक्षस्य च दूषणवचनं वाद इत्यभिधीयते ॥ १ ॥

प्रारम्भकश्चात्र जिगीषुः तत्त्वनिर्णिनीषुश्च ॥ ८-२ ॥

अत्र—वादे। प्रारम्भकः—वादस्य प्रारम्भकः-वादीति-यावत्। जिगीषुः—जयेच्छावान् तत्त्वनिर्णिनीषुश्च—तत्त्वनिर्णयेच्छावांश्च भवतीति शेषः ॥ २ ॥

स्वीकृतधर्मव्यवस्थापनार्थं साधनदूषणाभ्यां परं पराजेतुमिच्छुर्जिगीषुः ॥८-३ ॥

स्वीकृतो यो धर्मः कथञ्चिन्नित्यत्वादिस्तस्य व्यवस्थापनार्थं साधनदूषणाभ्यां—स्वपक्षसाधनेन परपक्षदूषणेन च, परं—प्रतिवादिनं पराजेतुमिच्छुर्जिगीषुः ॥ ३ ॥

तथैव तत्त्वं प्रतितिष्ठापयिषुस्तत्त्वनिर्णिनीषुः ॥८-४

तथैव— स्वीकृतधर्मव्यवस्थापनार्थं, साधनदूषणाभ्यां कथञ्चिन्नित्यत्वादिस्वरूपं तत्त्वं प्रतिष्ठापयितुमिच्छुस्तत्त्वनिर्णिनीषुः ॥ ४ ॥

अयं च द्वेधा-स्वात्मनि परत्र च ॥ ८-५ ॥

अयं च— तत्त्वनिर्णिनीषुः, द्वेधा—द्विप्रकारः, स्वाऽऽत्मनि परत्र च । कश्चित्तत्त्वेषु सन्देहात् स्वात्मनि तत्त्वनिर्णयमिच्छति, कश्चित्तु परोपकारैकपरायणतया परत्र-अन्याऽऽत्मनि तत्त्वनिर्णयमभिकाङ्क्षतीति ॥ ५ ॥

आद्यः शिष्यादिः ॥ ८-६ ॥

आद्यः—स्वात्मनि तत्त्वनिर्णिनीषुः शिष्यादिः । आदि-पदेन मित्रादयो ग्राह्याः ॥ ६ ॥

द्वितीयो गुर्वादिः ॥ ८-७ ॥

द्वितीयः—परत्र तत्त्वनिर्णिनीषुः ।

अयं द्विविधः—क्षायोपशमिकज्ञानशाली केवली च ॥ ८-८ ॥

अयं परत्र तत्त्वनिर्णिनीषुर्गुर्वादिः, द्विविधः-द्विप्रकारः । ज्ञानावरणीयस्य कर्मणः क्षयोपशमेनोत्पन्नं यत् मति-श्रुतावधि-मनःपर्यायरूपं ज्ञानं यस्यास्ति स क्षायोपशमिकज्ञानशाली, एकः । ज्ञानावरणीयस्य कर्मणः क्षयेणोत्पन्नं यत् केवलज्ञानं तद्वान् केवली, द्वितीयः । तदेवं चत्वारः प्रारम्भका वादिनः—[1]जिगीषुः, [2]स्वात्मनि तत्त्वनिर्णिनीषुः, [3]परत्र तत्त्वनिर्णिनीषुःक्षायोपशमज्ञानशाली, [4]परत्र तत्त्वनिर्णिनीषुकेवली चेति ॥ ८ ॥

एतेन प्रत्यारम्भकोऽपि व्याख्यातः ॥ ८-९ ॥

आद्यः—स्वात्मनि तत्त्वनिर्णिनीषुः शिष्यादिः। आदि-शब्देन मित्रादयो ग्राह्याः ॥ ६ ॥

द्वितीयो गुर्वादिः ॥ ८-७ ॥

द्वितीयः—परत्र तत्त्वनिर्णिनीषुः।

अयं द्विविधः—क्षायोपशमिकज्ञानशाली केवली च ॥ ८-८ ॥

अयं परत्र तत्त्वनिर्णिनीषुर्गुर्वादिः, द्विविधः–द्विप्रकारः। ज्ञानावरणीयस्य कर्मणः क्षयोपशमेनोत्पन्नं यत् मति-श्रुता-वधि–मनःपर्यायरूपं ज्ञानं यस्यास्ति स क्षायोपशमिक-ज्ञानशाली, एकः। ज्ञानावरणीयस्य कर्मणः क्षयेणोत्पन्नं यत् केवलज्ञानं तद्वान् केवली, द्वितीयः। तदेवं चत्वारः-प्रारम्भका वादिनः–[1]जिगीषुः, [2]स्वात्मनि तत्त्वनिर्णिनीषुः, [3]परत्र तत्त्वनिर्णिनीषुक्षायोपशमज्ञानशाली, [4]परत्र तत्त्व-निर्णिनीषुकेवली चेति ॥ ८ ॥

एतेन प्रत्यारम्भकोऽपि व्याख्यातः ॥ ८-९ ॥

लिनः केवलिना च सह वादो न सम्भवतीति षोडश-भेदेभ्यश्चतुरो भेदान् पातयित्वा द्वादशैव भेदा अत्राशिष्यन्ते ॥ ६ ॥

तत्र प्रथमे प्रथम-तृतीय-तुरीयाणां चतुरङ्ग एव, अन्यतमस्याप्यङ्गस्याऽपाये जय-पराजयव्यवस्थादिदौःस्थ्याऽऽपत्तेः ॥८-१०॥

अयमर्थः—तत्र चतुर्षु प्रारम्भकेषु वादिषु मध्ये यदा जिगीषुः प्रारम्भको वादी भवति, एवं जिगीषुः, परत्र तत्त्वनिर्णिनीषुक्षायोपशमज्ञानशाली, परत्र तत्त्वनिर्णिनीषुकेवली वा प्रतिवादी भवति तदा वादी–प्रतिवादि–सभ्य–सभापति-लक्षणश्चतुरङ्ग एव वादो भवति । एषु अन्यतमस्याप्यऽपाये-अभावे सति जय–पराजयव्यवस्था एव न स्यात्, वादिनो जिगीषुत्वेन शाठ्यकलहादिसम्भवात् ॥ १० ॥

द्वितीये तृतीयस्य कदाचिद् द्व्यङ्गः कदाचित् त्र्यङ्गः ॥ ८-११ ॥

द्वितीये—स्वात्मनि तत्त्वनिर्णिनीषौ वादिनि सति, तृतीयस्य परत्र तत्त्वनिर्णिनीषुक्षायोपशमज्ञानशालिनः, कदा-

निरु द्व्यङ्गः-द्वे वादिप्रतिवादिलक्षणे अङ्गे यस्य स द्व्यङ्गो वादो भवति। कदाचित् त्र्यङ्गः—वादिप्रतिवादिसभ्यलक्षण-त्र्यङ्गो वा वादो भवति।

भावार्थः—यदा परत्र तत्त्वनिर्णिनीषुः [illegible] ज्ञानशाली प्रतिवादी [illegible] वादिनि जयपराजयानिरपेक्ष [illegible] तत्त्वनिर्णयं कर्तुं समर्थः, तदा-इतरस्य सभ्य-सभापति [illegible] द्व्यङ्ग एव वादो भवति। यदा तु [illegible] प्रतिवादिना वादिनि तत्त्वनिर्णयो न कर्तुं [illegible] [illegible] [illegible] भावः ॥१२॥

[illegible] ॥ ८-१२ ॥

[illegible] तत्त्वनिर्णिनीषौ वादिनि [illegible] द्व्यङ्गः—वादिप्रति[illegible] वादो भवतीत्यर्थः ॥ १२ ॥

[illegible] यथायोगं [illegible] ॥ ८-१३ ॥

[illegible] तत्त्वनिर्णिनीषौ [illegible] प्रतिवादि[illegible]

तत्त्वनिर्णिनीषोः, परत्र तत्त्वनिर्णिनीषोः, क्षायोपशमज्ञानशालिनश्च प्रतिवादिनो द्व्यङ्गः कदाचित् त्र्यङ्गः परत्र तत्त्वनिर्णिनीषोः केवलिनो द्व्यङ्ग एव वादो भवतीत्यर्थः ॥१३॥

तुरीये प्रथमादीनामेवम् ॥ ८-१४ ॥

परत्र तत्त्वनिर्णिनीषौ केवलिनि वादिनि सति प्रथमस्य जिगीषोः चतुरङ्गो वादो भवति। स्वात्मनि तत्त्वनिर्णिनीषोः, परत्र तत्त्वनिर्णिनीषोः, क्षायोपशमज्ञानशालिनश्च द्व्यङ्ग एव वादो भवति। तथाचोक्तम्—

"प्रारम्भकापेक्षतया यदेवमङ्गव्यवस्था लभते प्रतिष्ठाम्।
संचिन्त्य तस्मादमुमादरेण प्रत्यारभेत प्रतिभाप्रगल्भः"
इति ॥ १४ ॥

वादि-प्रतिवादि-सभ्य-सभापतयश्चत्वार्यङ्गानि ॥ ८-१५ ॥

वादस्येति शेषः ॥ १५ ॥

प्रारम्भक-प्रत्यारम्भकावेव मल्ल-प्रतिमल्लन्यायेन वादिप्रतिवादिनौ ॥ ८-१६ ॥

मानेन पक्षप्रतिपक्षयोः स्थापन् प्रसाधनदूषणकेलिकर्मठौ ।
वादेऽत्र पक्षप्रतिपक्षवादिनौ वदन्ति वादिप्रतिवादिनौ बुधाः
॥ १७ ॥

वादिप्रतिवादिसिद्धान्ततत्त्वनदीष्णत्व-धारणा-बाहुश्रुत्य-प्रतिभा-क्षान्ति-माध्यस्थ्यैरुभयाभिमताः सभ्याः ॥ ८-१८ ॥

नदीष्णत्वं-कुशलत्वं, शेषं स्पष्टम् ॥ १८ ॥

वादि-प्रतिवादिनोर्यथायोगं वादस्थानककथाविशेषाङ्गीकारणाऽग्रवादोत्तरवादनिर्देशः, साधकबाधकोक्तिगुणदोषावधारणं, यथावसरं तत्त्वप्रकाशनेन कथाविरमणं, यथासम्भवं सभायां कथाफलकथनं चैषां कर्माणि ॥ ८-१९ ॥

यदा वादिप्रतिवादिनौ स्वयमनङ्गीकृतपक्षप्रतिपक्षौ प्रवर्तेते तदा 'त्वया शब्दस्य नित्यत्वं साधनीयं त्वया च कथञ्चिन्नित्यत्वम्' इत्येवंरूपयोः पक्षप्रतिपक्षयोरङ्गीकारणा, 'सर्वानुवादेन दूष्यानुवादेन वा वक्तव्यम्' इत्येवंरूपस्य

शेषस्याङ्गीकारणम्, 'अनेन प्रथमं वक्तव्यमनेन पश्चात्' इत्य-ग्रवादोत्तरवादनिर्देशः, वादिप्रतिवादिभ्यामभिहितयोः साधकबाधकवचनयोर्गुणदोषावधारणं, यदा एकेन प्रतिपादितमपि तत्त्वमन्येन नाभ्युपगम्यते, यदा वा द्वावपि तत्त्वपराङ्मुखमुदीरयन्तौ न विरमतः तदा तत्त्वप्रकाशनेन तयोर्विरमणं, जयपराजयादिरूपं वादफलकथनं चैषां-सभ्यानां कर्माणि-कर्तव्यानि ॥ १६ ॥

प्रज्ञाऽऽज्ञैश्वर्य-क्षमा माध्यस्थसम्पन्नः सभापतिः ॥ ८-२० ॥

* * * * *

वादि--सभ्याभिहितावधारणं कलहव्यपोहादिकं चास्य कर्म ॥ ८-२१ ॥

वादिप्रतिवादिभ्यां सभ्यैश्च कथितस्यावधारणं, कलहनिराकरणम्, आदिना पारितोषिकवितरणादिकं चास्य-सभापतेः कर्म-कर्तव्यम् ॥ २१ ॥

सजिगीषुकेऽस्मिन् यावत्सभ्यापेक्षं स्फूर्तौ वक्तव्यम् ॥ ८-२२ ॥

जिगीषुणा जिगीषुभ्यां जिगीषुभिर्वा सह वर्तत इति सजिगीषुकेऽस्मिन् वादे, यावत् सभ्या अपेक्षन्ते स्फूर्तौ सत्यां-प्रतिपादनोत्साहे सति, तावद् वक्तव्यम् ॥ २२ ॥

उभयोस्तत्त्वनिर्णिनीषुत्वे यावत्तत्त्वनिर्णयं यावत्स्फूर्ति च वाच्यम् ॥ ८-२३ ॥

उभयोः—वादिप्रतिवादिनोस्तत्त्वनिर्णिनीषुत्वे यावता तत्त्वनिर्णयो भवति तावत् स्फूर्तौ सत्यां वक्तव्यम्, अनिर्णये वा यावत्स्फुरति तावद्वक्तव्यम् ॥ २३ ॥

छात्राणामुपकाराय रामगोपालशर्मणा ।
वह्निसिध्यङ्कभूम्यब्दे टिप्पणीयं विनिर्मिता ॥

इतिबालबोधिन्याख्यया टिप्पण्या विभूषिते श्रीवादिदेवसूरिसंदृब्धे प्रमाणनयतत्त्वाऽऽलोके वाद-वादि—सभ्य-सभापति-स्वरूपनिर्णायको नामाऽष्टमः परिच्छेदः ॥

श्रीप्रमाणनयतत्त्वालोकः समाप्तः ।

* अर्हम् *

श्रीप्रमाणनयतत्त्वालोके पाठान्तराणि।

मुद्रितसूत्राङ्क.। कपुस्तकपाठः।	खपुस्तकपाठः*।
१— १—अथ प्रमाणनय०	
१—१७—०यथा करिकलभक-महामिहात्मना०	
२— १—	प्रत्यक्षं परोक्ष च।
२—१६—तथाहि-न खल्वदृष्ट०	तथाहि न खल्वदृष्ट०
३—२५—यथा त्रिविधं०	
३—३१—०असत्यनुपपत्तेरिति।	- -
३—३६—०प्रतिपक्षप्रतिबन्धकस्य०	
३—३९—०तथैवोपपत्ते· ·· पाकस्थानम्।	०तथैवोपपत्ते ··· ···पाकस्थानम्।
३—४६—	०यथा महानसे।
३—४८—०यथा जलाश्रय·।	
३—६५—कालत्रयापेक्षिणी तादात्म्य	कालत्रयापेक्षिणी तादात्म्य०
३—७७—०यश्च न परिणतिमान्०	
३—७८	०धूमोपलम्भादिति।
३—७९—	भविष्यति वृष्टिस्तथा०

* अनुक्रमसंख्या (न०) २५०२, एकादशपृष्ठात्मक पुस्तकमतद्धकम्। अनुक्रम

मुद्रितग्रन्थः ।	कपुस्तकपाठः ।	खपुस्तकपाठः ।
२—८१—	०पूर्वफाल्गुन्य उत्तरफाल्गुनीना०	उदगुर्मुहूर्ता पूर्वफाल्गुन्य उत्तरफाल्गुनीनामुदयोपलब्धेः०
२—८४—	०ग्रन्था०	
२—८७—		०तत्त्वेषु विनिश्चय ०
२—९०		०रोहिण्युदयात् ।
२—९१—	०पूर्वफाल्गुन्युदयात् ।	०पूर्वफाल्गुन्युदयात् ।
२—९८—		०भद्रान्त०
२-१०१-		०उत्तरभाद्रपदोद्गमा०
२-१०६-		०सम्यग्दर्शनानुपलम्भात् ।
४— ५—	यस्य हि वचन०	
४— ७—		०लोकोत्तरस्तीर्थकरादि. ।
४—१२—		०विधिनिषेधाभ्या०
४—२१—	०सप्तम ।	
४—२७—		०चेतसि न निषेयन् ।
४—४२—	०स्वभावा वा०	
५— ५—		०साधारणद्रव्य०
६— २—		तद् द्विधानन्तर्येण०
६—१६—		०नि पातन्वात् ।
६—३६—	०इत्यादि ।	०इत्यादि ।
६—४०—		०निराकृतत्वादनेकप्रकार' ।
६—४६—	०एव चेति०	०स द्वेधा०
६—५५—		०विवादापदपुनान्०
६—५७—	०वृत्तिकस्य यथा०	

पाठान्तराणि ।

मुद्रितपृष्ठाङ्कः ।	कपुस्तकपाठ ।	खपुस्तकपाठः ।
७—२७—	०इत्यादिर्यथा ।	
७—२९—	कारिकुरङ्गशब्द-वादित्यादि ।	
७—४०—		०क्रियाविशिष्टमर्थ० ।
७—४२—		०क्रियानाविशिष्टं०
७—४३—	०इत्यादि ।	
७—४५—		शेपास्त्रय ०
७—५६—	०पौद्गलिकादृष्टवांश्च ।	
८— २—		०विजिगीपु ०
८—१९—	०कारेणाप्र ··प्रकाशेन०	
८—२१—	वादिप्रतिवादिसभ्या०	



श्रीप्रमाणनयतत्त्वालोके

शुद्धिपत्रकम् ।

अशुद्धम्	शुद्धम्	पृष्ठे	पंक्तौ
जतम् ॥	रजतमिति ॥	११	७
तुर्मंहति	०तुमर्हति	१२	२
नु	ननु	१५	१६
०प्यन्पने	०प्यन्येन	१६	१६
। १६ ॥	।	१६	१८
ान्यवहा०	मान्यवहा०	२२	१३
विकल्पकम्	विकल्पम्	२३	१६
तुर्भेदम्	चतुर्भेदम्	२४	२
न्चित् पृथ	कथञ्चित्पृथ०	२४	१०
ुवे	शुश्राव	२६	११
ादुभवति.	प्रादुर्भवति	,,	१५
काली०	त्रिकाली०	२७	२
ोरुपनहार	हेतोरुपमहार	४४	१२
ल्मभेदात	०लक्ष्मभेदात	४५	१
०तिमि	०मिति	५०	११
०धर्मसत्त	०धर्मसत्ता	५३	१
०नाच्यन्ते,	०नोच्यन्ते,	५४	११
। नवार०	निवार०	६३	४
०मुदयोप०	०मुद्गमोप०	६६	५
प्रतिपात्ते	प्रतिपत्तौ	,,	१२
०शान्ति.	शान्ति,	६८	७
०लब्धि००	०लब्धि०	७१	४
॥४–१०१॥	॥३–१०१॥	७५	८
०ज्ञानमाग-शब्दे०	ज्ञानमागम-शब्दे०	७६	६
०कर्तकत्वात्"	०कर्तृकत्वात्"	७८	१३
०रपौरुपेय०	०रपौरुषेय०	,,	१४
पदं	पदं.	८०	१२
		८२	६